अथ षोडशावताराणां सामान्यतः तंत्रोक्ताः पूजोपचारमंत्राः।।

मंत्रात्मा मंत्रराजोऽयं परमात्मात्मभूः स्वयम्। गूढश्चरति तंत्रेषु मंत्रबीजार्थगर्जितः। त्वयान्वितं जगत्सर्वं तत्त्वमसि न संशयः। शून्याकारं निराकारं साकारं सर्वतोमुखम्। मंत्रराज महाराज योगिराज जगत्पते। सुवर्णवर्णः सर्वात्मा त्वमेकोऽसि जगद्गुरुः। इति आवाहनम्।। **येषु येषु च भावेषु भक्त्या त्वां परमेश्वर। साधवो भावयंत्यात्मा त्वं तथा तत्र भाससे। भेदाभेदौ न च स्थित्या मंत्रराज जगत्पते। त्वमेवैकः परस्त्राता न चैवान्योऽस्ति तत्त्वतः।** इति आसनम्।। **सर्वतः पाणिपादं तद्रूपं जगन्नगात्मकम्। न तन्नातद्विवेकेन विश्वेशं विदितं परम्।** इति पाद्यम्।। **त्वमेव सर्वयोगानां भोक्ता साक्षी गुरुर्गतिः। फलं तत्कारणं बीजस्थानं त्वमसि तत्त्वतः।** इति अर्घ्यम्।। **अमृतादमृतं मर्त्या भजन्ति भवनाशनम्। मंत्रराजमिदं पुण्यं दुःखांकुरविमर्दनम्।** इति आचमनम्।। **असंगो ह्यजरः साक्षी नित्यसिद्धो निरामयः। नित्यानंदमयो देवः सर्वत्राप्यमलो बुधः।** इति स्नानम्।। **स्वमायया प्रगुप्तात्मा मायानाश्रयमोहिनी। यस्यायं पुरुषः पूर्णः परमात्मा परं पदम्।** इति वस्त्रम्।। **ब्रह्मनामकसूत्रं तु ब्रह्मसूत्रं प्रकीर्तितम्। ब्रह्मैव ब्रह्मसूत्रं तद्यस्मिन्प्रोतं चराचरम्।** इति यज्ञोपवीतम्।। **उत्तमं पुरुषं पूर्णमगोचरमनामयम्। ध्याये त्वां देवदेवेश मंत्रराज नमोऽस्तु ते।** इति गंधम्।। **अतर्क्योऽयमनन्तोऽयमद्वयः पुरुषेश्वरः। पूर्णानंदो घनश्यामः सिद्धराजोऽब्जलोचनः।** इति अक्षताः।। **नानाश्चर्यमयं देवं नानाश्चर्यविनिर्गतम्। निगमागमगोप्तारं गोपतिं श्रीपतिं भजे।** इति अलंकारः।। **यस्मिन्भाति जगत्सर्वं भासा यस्य प्रवर्तने। तस्मै सर्वगुणाभासमूर्तये ब्रह्मणे नमः।** इति पुष्पाणि।। **यद्भाति रोचते यच्च येनेदं ततमेव हि। सत्यं तच्चिन्मयं ब्रह्म स्वयमेवावभासते।** इति धूपः।। **चिन्मयं चैव चिद्वस्तु चेतनं घननिर्मलम्। ब्रह्मैव मंत्रराजोऽयं सुरराजो जनप्रियः।** इति दीपः।। **सर्वदुःखान्तकस्त्राता सर्ववित्स परः स्वभुक्। सर्वात्मा सर्वसर्वज्ञः सर्वसर्वोत्तमोत्तमः।** इति पूर्वापोशनम्।। **मंत्रराजमूर्तये स्वाहा। मंगलमूर्तये स्वाहा। सज्जनप्रियाय स्वाहा। साधूनां पतये स्वाहा।**

परब्रह्ममूर्तये दत्तात्रेयाय स्वाहा। इति उत्तरापोशनम्।। **प्रणवेनादावन्ते चापोशनमिति।** नैवेद्यम्।। **कर्ता कर्म च कार्यं च चतुर्थं कर्मणः फलम्। ब्रह्मैव भासते सर्वं मंत्रेश्वरप्रसादतः।** इति फलम्।। **वेदवेदार्थसंसारविसारं सर्वमंगलम्। सर्वभूतमयं ब्रह्म वन्दे मंत्रमयं शिवम्।** इति करोद्वर्तनम्।। **योगारिष्टहरं देवं भोगमोक्षफलप्रदम्। मंगलं परमं धाम शंकरं प्रणमाम्यहम्।** इति पुनर्धूपम्।। **भावस्याभावको भावो नाभावो भावभावभाक्। भासते भावरूपात्मा भावना भावभावना। भावाभावौ च संत्यज्य भावस्वभावभाक्। तस्मै शुद्धाय शांताय मंगलाय च ते नमः।** इति तांबूलम्।। **अदृश्यं दृश्यते दृश्यं तद्दृश्यं दृश्यते न हि। दृश्यादृश्यविदृश्यत्वाद्रूपं ते मंगलं परम्।** इति दक्षिणा।। **ज्ञात्वा ज्ञेयं वेदनं च ज्ञायते यत्पदं न हि। सत्यं तच्चिन्मयं ब्रह्म स्वयमेवावभासते।** इति महावस्त्रम्।। **स्वप्रकाशः प्रकाशात्मा परमात्मा परात्परः। परब्रह्मात्मभूतात्मा स्वयंज्योतिः सदाशिवः।** इति महानीराजनम्।। **मंत्रेश्वर महाराज मंत्रबीज जनाश्रय। प्रभो त्वं देवदेवेश सर्वोऽसि त्वं जगत्पते। सत्यज्ञानानन्दमयं रूपं ते मंगलं परम्। दत्तात्रेय मंत्रराज ज्ञानबीज नमोऽस्तु ते।** इति मंत्रपुष्पांजलिम्।। **भद्रं त्वमेव सर्वत्र सच्चिदानंदमव्ययम्। प्रसीद देवदेवेश दत्तात्रेय नमोऽस्तु ते।** इति देवस्योपरि जलं भ्रामयेत्। **नमस्ते दिव्यरूपाय नमस्ते बोधमूर्तये। मंत्रमयाय देवाय दत्तात्रेयाय ते नमः।** इति प्रार्थनाक्षमापनम्।। प्रत्युपचारं तत्तदवतारनाम चतुर्थ्यंतं नमोऽन्तमुक्त्वोपचारो देयः इति सामान्यतः पूजाविधिः।।

।। श्रीरस्तु।। ।। तत्सद्ब्रह्मार्पणमस्तु।। ।। शुभं भवतु।।

श्रीदत्तात्रेयषोडशावतारजयन्तानां नामकालादिदर्शकं पत्रकम्।

अवतारानुक्रमाः	नाम	मासः	पक्षः	तिथिः	वारः	नक्षत्रम्	यामः	मुहूर्तः	दानम्
१	योगिराजः	कार्तिकः	शुक्ल	१५	बुधः	कृत्तिका	प्रथमः	प्रथमः	नारिकेलफलम्
२	अत्रिवरदः	कार्तिकः	कृष्ण	१	गुरुः	रोहिणी	प्रथमः	द्वितीयः	कदलीफलम्
३	दत्तात्रेयः	कार्तिकः	कृष्ण	२	भृगुः	मृगशीर्ष	प्रथमः	सूर्योदये	इक्षुः
४	कालाग्निशमनः	मार्गशीर्षः	शुक्ल	१४	बुधः	रोहिणी	द्वितीयः	द्वितीयः	पञ्चामृतम्
५	योगिजनवल्लभः	मार्गशीर्षः	शुक्ल	१५	गुरुः	मृगः	चतुर्थः	सूर्यास्ते	मौक्तिकम्
६	लीलाविश्वंभरः	पौंषः	शुक्ल	१५	बुधः	पुष्यम्	प्रथमः	सूर्योदये	अन्नम्
७	सिद्धराजः	माघः	शुक्ल	१५	गुरुः	मघा	द्वितीयः	द्वितीयः	पुस्तकम्
८	ज्ञानसागरः	फाल्गुनः	शुक्ल	१०	रविः	पुनर्वसुः	प्रथमः	सूर्योदये	मन्दिरम्
९	विश्वंभरोऽवधूतः	चैत्रः	शुक्ल	१५	भौमः	चित्रा	द्वितीयः	प्रथमः	गौः
१०	मायामुक्तोऽवधूतः	वैशाखः	शुक्ल	१४	बुधः	स्वातिः	द्वितीयः	मध्याह्ने	दध्योदनम्
११	मायायुक्तोऽवधूतः	ज्येष्ठः	शुक्ल	१३	स्वातिः	स्वातिः	प्रथमः	प्रथमः	मधु
१२	आदिगुरुः	आषाढः	शुक्ल	१५	मंदः	उत्तराषाढा	प्रथमः	द्वितीयः	सुवर्णम्
१३	शिवरूपः	श्रावणः	शुक्ल	८	चन्द्रः	स्वातिः	प्रथमः	प्रथमः	उदकम्
१४	देवदेवः	भाद्रपदः	शुक्ल	१४	भृगुः	शततारका	प्रथमः	द्वितीयः	ताम्बूलम्
१५	दिगम्बरः	आश्विनः	शुक्ल	१५	बुधः	अश्विनी	प्रथमः	प्रथमः	वस्त्रम्
१६	कृष्णश्यामलनयनः	कार्तिकः	शुक्ल	१२	बुधः	रेवती	प्रथमः	सूर्योदये	रौप्यम्



श्रीदत्तात्रेयषोडशावतारचरित्रानि

१४५. प्रथमचरित्रप्रारंभः

श्रीगणेशाय नमः।। श्रीदत्तगुरुभ्यो नमः।।

वेदधर्मा दीपकं प्रति कथयति-

यदुक्तमाथर्वणिके विधात्रे क्षेत्रे च सत्याभिध आत्ममूर्तेः।।
श्रीविष्णुनोपासनमात्ममुक्त्यै भक्त्यैकगम्यस्य तदत्र वच्मि ।।१।।
नारायणं लोकगुरुं शरण्यम्। कारुण्यसिन्धुं विधिनोपगम्यम्।।
ब्रह्माभिवाद्याह हराद्य चिन्तां किं तारकं तद्वद वेदवेद्य ।।२।।
एवं निशम्यात्मभुवो नियोगम्। साङ्गं निजोपासनमुक्तवान् सः।।
त्वं सात्त्विकं मामकमेकमेव। भावज्ञ धामातितरामुपास्व ।।३।।
दत्तोऽहं ते मयेत्यात्मदानेनाहमवातरम्।।
दत्तोऽहमिति तद्रूपमुपास्यं निखिलैः सदा ।।४।।
रामाद्या येऽवतारा इह वृषधृतये स्वाश्रमाद्यादरास्तै-
रैकात्म्येऽप्येष वर्णोत्तम इतरनुतः स्वाश्रमस्थैश्च वन्द्यः।।
श्रीदत्तोऽत्याश्रमस्थः खलु सकलसुहृद्योऽवधूतोऽर्च्य आत्मा-
ऽऽकल्पं वर्षति देवर्ष्यसुरसुरनुतस्त्र्यात्मकत्वात्परात्मा ।।५।।
न मे पार्थास्ति कर्तव्यमित्याद्यैर्भगवांस्त्रिभिः।।
श्लोकैः संकरशांत्यै लोकसंग्रहकृज्जगौ ।।६।।
रामकृष्णादिभिः पूर्वं लोकसंग्रहसिद्धये।
मर्यादापालनार्थाय स्वावतारानुसारतः ।।७।।
प्रत्युत्थानाभिवादाद्यैः सर्वज्ञैरपि सेविताः।
विप्राश्रिता वसिष्ठाद्या गुरवो गौरवादरैः ।।८।।
तैः सर्वैरवधूतोऽयं श्रीदत्तो भगवान्स्वयम्।
अयोनिसंभवत्वाच्चात्याश्रमित्वाच्च सर्वथा ।।९।।
सेवनीयो वंदनीयो भूयो भूयो न संशयः।
किं पुनर्मानवैरज्ञैः पराधीनैर्हितेच्छुभिः ।।१०।।

निरुपाधिकमेकं यन्निर्गुणं निर्विकारकम्।
निरञ्जनं निरवधि चैतन्यात्मकमद्वयम् ।।११।।
परिपूर्णं परं ब्रह्म सच्चिदानंदविग्रहम्।
नित्यं शुद्धं नित्यमुक्तं विबुद्धं सर्वकारणम् ।।१२।।
नैव किञ्चित्कृतं तेन स्वरूपेणोद्भवादिकम्।
सत्तामात्रस्वरूपात् सर्वाधारतयापि च ।।१३।।
सर्वस्यापि विवर्तोपादानत्वान्निर्विकारतः।
सर्वं कृतमिवेत्याहुस्तेनैव परमात्मना ।।१४।।
शुद्धाद्वैतस्वरूपत्वात्तेन किञ्चित्कृतं न हि।
निर्गुणेऽस्मिन्निर्विकारे सर्वमारोपयन्ति हि ।।१५।।
वेदा अपि प्रवृत्ता यद्वर्णने तेऽपि सर्वथा।
चकिता हि यतो वाचो निवर्तन्त इति श्रुतेः ।।१६।।
उपाधित्वेन चादाय स्वात्मशक्तिं स एव हि।
अभवद्देवदेवेशः सर्वज्ञः सर्वकारणम् ।।१७।।
अव्यक्तादिकमेतेन सर्वं सृष्टं चराचरम्।
वेदशास्त्रपुराणादावादिकर्ता स गीयते ।।१८।।
स कुर्वाणोऽप्यकर्तैव कुर्वन्नपि न लिप्यते।
आदिकर्ता स भगवानव्यक्तत्वं स्वयं गतः ।।१९।।
ततः स सूक्ष्मभूतानि त्रिगुणानि बभूव ह।
तेषां सत्त्वांशतः पंच धीन्द्रियाणि पृथक् ततः ।।२०।।
तत्सत्त्वांशैक्यतो जातमन्तःकरणमेव तत्।
चतुर्विधं विमर्शादिवृत्तिभेदेन चाभवत् ।।२१।।
सूक्ष्मभूतरजोंऽशेभ्यः पंचकर्मेन्द्रियाणि च।
तद्रजोंऽशैक्यतः प्राणो वृत्तिभेदात्स पंचधा ।।२२।।
तेभ्यो लिङ्गशरीराणि तदैक्यं सूत्रमुच्यते।
पंचीकृतेभ्यो भूतेभ्यः स्थूलसृष्टिरजायत ।।२३।।

ब्रह्मांडं च तदंतस्थाः कृता लोकाश्चतुर्दश।
अन्नपानादिभोग्यं च देहा अपि चतुर्विधाः ।।२४।।
वैश्वानरस्य देहोऽयं चराचरजगन्मयः।
विराडित्युच्यते यस्माद्देववर्णादिसृष्टयः ।।२५।।
आपो नारा इति प्रोक्ता अयनं तस्य ताः पुरा।
अतो नारायणोऽसौ तन्नामे कः समवर्तत ।।२६।।
स तप्त्वा तु आसाद्य सर्गसामर्थ्यमीशितुः।
सनकादीन् ससर्जादौ सप्त मानसिकांस्ततः ।।२७।।
मरीच्यात्रिमुखान्स्वाङ्गछायातः कर्दमं मुनिम्।
स्ववामदक्षिणाङ्गाभ्यां शतरूपां मनुं च सः ।।२८।।
ताभ्यां प्रियव्रतोत्तानपादौ कन्यात्रयं तथा।
आकूतिर्देवहूतिश्च प्रसूतिश्च विश्रुतम् ।।२९।।
कर्दमाय ददौ देवहूतिं स्वायंभुवो मनुः।
अभवन्नव कन्या हि देवहूत्यां प्रजापतेः ।।३०।।
मरीच्यादिमुनिभ्यस्ता विधिना प्रददौ मुनिः।
सपत्नीका मरीच्याद्याः सृष्ट्यर्थं ब्रह्मणेरिताः ।।३१।।
यो ब्रह्मविद्वरीयान् स द्वितीयोऽत्रिर्विधेः सुतः।
नैच्छत् किमपि कर्तुं हि स्वानंदरसनिवृत्तः ।।३२।।
जीवतो वाक्यकरणात्पितुः पुत्रस्य पुत्रता
इत्यजोऽनुशशासात्रिं ब्रह्मा सृष्टिप्रवर्तकः ।।३३।।
परतो यस्य नोत्थानं स्वतोऽपि न कथंचन
अवृत्तित्वान्न तस्यास्ति विधिर्नापि निषेधकः ।।३४।।
सद्ब्रह्मविद्वरीयत्वाच्चिकीर्षोर्लोकसंग्रहम्।
अत्रेस्तु वृत्तिसद्भावादासीत्परत उत्स्थितिः ।।३५।।
ततः स्वपितुरादेशं कर्तुमत्रिः समुत्थितः।
अत एवाह मैत्रेयो भगवान् श्लोकमुत्तमम् ।।३६।।

ब्रह्मणा नोदितः सृष्टावत्रिर्ब्रह्मविदां वरः।
सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ।।३७।।
इत्युक्तेः शोभनं त्वेतत्सर्वमेव न संशयः।
अन्वर्थकोऽत्रिर्भगवान्सहपत्न्या तपोऽतपत् ।।३८।।
धर्मार्थकामेषु नातिचरितव्या वधूरिति।
पुत्रार्थी सह पत्न्यैव तपस्तप्तुं गतो मुनिः ।।३९।।
भगवांस्तत्र तदनुग्रहायाविरभूत्स्वयम्।
कार्तिके शुक्लपक्षे तु पूर्णिमायां ज्ञवासरे ।।४०।।
आद्ये यामे मुहूर्ते च योगिराजो ह्यवातरत्।
निराकारोऽप्युपासार्थं साकारत्वं गतः प्रभुः ।।४१।।
शुद्धस्फटिकसंकाशः परानंदमयः पुमान्।
नित्यशुद्धस्वात्मरूपनिष्ठत्वाद्योगिनामेव ।।४२।।
योगप्रवर्तकत्वाच्च योगिराज इति स्मृतः।
योगिराजजयंतीयं दुःखयोगवियोगदा ।।४३।।
अस्यामेव जयंत्यां स पूजयित्वा प्रयत्नतः।
पूजांतेऽर्घ्यत्रयं दद्यान्मन्त्रैरेतैरुपासकः ।।४४।।
(मंत्राः)मायागुणविमुक्ताय सर्वलोकेश्वराय च।
योगिराजाय देवाय कर्मणार्घ्यं ददाम्यहम् (१) ।।४५।।
अद्वयानंदरूपाय योगमायाधराय च।
योगिराजाय देवाय कर्मणार्घ्यं ददाम्यहम्(२) ।।४६।।
अव्यक्ताव्यक्तरूपाय निर्गुणाय गुणात्मने।
योगिराजाय देवाय कर्मणार्घ्यं ददाम्यहम्(३) ।।४७।।
कायेन यत्कृतं कर्म वचसा यत्कृतं मया।
मनसा यत्कृतं तेऽस्तु योगिराज समर्पणम् ।।४८।।
एवमर्घ्यत्रयं दत्वा नमोऽन्तं प्रणवादिकम्।
योगिराजमनुं भक्त्या जपेत्तद्गतमानसः ।।४९।।

नारिकेलफलं दत्त्वा प्रयतः प्रार्थयेत्प्रभुम्।
योगिराजजयन्त्याख्यं यन्मयैतद्व्रतं कृतम् ।।५०।।
अनेन प्रीयतां योगिराजः श्रीभगवान्स्वयम्।
एवं संप्रार्थ्य देवेशं यथाविभवविस्तरम् ।।५१।।
ब्राह्मणान्भोजयित्वाऽथ भुञ्जीत स्वसुहृद्युतः।
कथां च शृणुयादेतां पापतापप्रणाशिनीम् ।।५२।।
श्रीदत्तस्यावतारोऽयं योगिराज इति स्मृतः।
प्रथमोऽथ द्वितीयोऽत्रिवरदाख्यो निगद्यते ।।५३।।

इति श्रीयोगिराजावतारो नाम प्रथमोऽध्यायः संपूर्णः।।



अथ द्वितीयचरित्रप्रारंभः।

श्रीगणेशाय नमः। श्रीअत्रिवरदाय नमः।।

यो योगिराज उक्तोऽत्रिवरदोऽपि स एव हि।
रूपान्तरेण द्वितीयावतारोऽभूत्स उच्यते ।।१।।
अत्रिः पित्राज्ञया तप्त्वा तपः परमदुष्करम्।
ऋक्षाद्रौ परमे तीर्थे वायुभक्षो जितेन्द्रियः ।।२।।
प्राणायामेन संयम्य मनो वर्षशतं शुचिः।
अतिष्ठदेकपादेन सकृद्दृष्टं महौजसम् ।।३।।
ज्ञानानन्दघनं नित्यं प्रधानगुणतः परम्।
योगिराजं महात्मानं चिंतयामास सर्वदा ।।४।।
प्रजामात्मसमां मह्यं ददातु भगवानयं।
इति सञ्चिन्त्य तपसि स्थितोऽत्रिमुनिसत्तमः ।।५।।
शतवर्षेषु यातेषु तपसोग्रेण मस्तकात्।
निर्गतं सुमहत्तेजस्त्रैलोक्यमतपत्ततः ।।६।।
भूचराः खेचरा जीवाः सर्वे देवाः सदानवाः।
परमोग्रेण तपसा सञ्जाता भयविह्वलाः ।।७।।
सर्वे देवाश्च ऋषयो ब्रह्मविष्णुमहेश्वरान्।
स्वस्त्यर्थं शरणं जग्मुः सर्वे ते भयविह्वलाः ।।८।।
देवर्षिप्रार्थिता ब्रह्महरिशर्वा दयालवः।
मा भैष्टेत्यभयं दत्वा समारुह्य स्वधारणम् ।।९।।
चिह्निताः स्वस्वचिह्नैस्ते मुनेराश्रममुत्तमम्।
आगत्योत्थापयामासुस्तपसोऽत्रिं स्वतेजसा ।।१०।।
ततः पराग्दृशिः सोऽत्रिः स्वस्वचिह्नैश्च चिह्नितान्।
दृष्ट्वा ब्रह्महरीशान्प्राब्रवीदर्हणाञ्जलिः ।।११।।
एक एव मया ध्यातो यूयं त्रय इहागताः।
किमर्थमिति भातीदं चित्रं हृद्वागगोचराः ।।१२।।

एवं मे संशयं छेत्तुं भगवंतः क्षमाः किल।
यदत्र चापलं मे तत्क्षन्तव्यं भक्तवत्सलैः ।।१३।।
ते ऊचुस्तात भद्रं ते सत्संकल्पस्त्वमेव हि।
यो ध्यातोऽत्र त एवामी वयं जानीहि नोऽद्वयान् ।।१४।।
अस्माकं मुनिशार्दूल भेदो न परमार्थतः।
कर्तव्योऽत्र न संदेहो यत एकात्मका वयम् ।।१५।।
निजोपाधिगुणानेव गृहीत्वात्र वयं त्रयः।
सृष्टिस्थितिविनाशार्थं त्रिविधत्वं गता इव ।।१६।।
पश्य नोऽलौकिकं रूपं पूर्वदृष्टं प्रयत्नतः।
इत्युक्त्वान्तर्हितास्ते तु तदाऽपश्यत्पुरो मुनिः ।।१७।।
योगिराजं महात्मानं योगमार्गप्रवर्तकं।
शुद्धस्फटिकसंकाशं भासयन्तं दिशो दश ।।१८।।
क्षणेन दृश्यते तत्तु त्रिगुणात्मकमुत्तमम्।
योऽत्रिणाऽऽराधितो योगतपसाऽकल्मषेण सः ।।१९।।
योगाध्यक्षो योगराजो योगसंसिद्धिदः प्रभुः।
अत्रिसंकल्पसिद्ध्यर्थं वरदानार्थमुद्यतः ।।२०।।
तप्तकाञ्चनसंकाशः षड्भुजः सुस्मिताननः।
यथाहूतो निद्रितो ना प्रज्ञानालंबनेन हि ।।२१।।
बहिर्मुखो भवत्येवं भगवानप्ययं तथा।
चित्प्रकृत्यवलंबेन शबलत्वमुपेत्य सः ।।२२।।
भूत्वा बहिर्मुख इव देवो भक्तानुकंपया।
आविर्बभूव सहसा कार्तिके मासि पुण्यदे ।।२३।।
कृष्णपक्षे प्रतिपदि रोहिण्यां गुरुवासरे।
प्रथमे प्रहरे चैव मुहूर्ते प्रथमे विभुः ।।२४।।
अवतारो द्वितीयोऽत्रिवरदाख्योऽयमीशितुः।
तप्तकाञ्चनसंकाशं षड्भुजः सुस्मिताननः ।।२५।।

त्रिगुणात्मकमायायुक् त्रिमूर्तिवरवेषधृक्।
त्रिमूर्तित्वाद् ब्रह्मविष्णुशिवलक्षणलक्षितः ।।२६।।
मालाकमंडलुरधःकरपद्मयुग्मे।
मध्यस्थपाणियुगुले डमरूत्रिशूले।।
यस्य स्त ऊर्ध्वकरयोः शुभशंखचक्रे।
ध्यायेत्तमत्रिवरदं भुजषट्कयुक्तम् ।।२७।।
ब्रह्मचिह्नमधःपाण्योर्विष्णुचिह्नं च मध्ययोः।
ऊर्ध्वयोः करयो रुद्रचिह्नं ज्ञेयं विचक्षणैः ।।२८।।
न निष्प्रयोजनानि स्युरायुधानि जगद्गुरोः।
स्वकार्यसिद्धिहेतूनि न च तानि कथंचन ।।२९।।
अद्वितीयस्य तस्य मालया कस्य वा जपः।
निष्क्रियस्याविकारस्य का कमंडलुना क्रिया ।।३०।।
किं स्वानंदनिमग्नस्य विभोर्डमरुशंखतः।
अद्वयस्य भयाभावात् किं शस्त्राभ्यां प्रयोजनं ।।३१।।
स्वभक्तानुग्रहायैव विभोर्मालादिधारणं।
एकस्मिन्नस्य वपुषि स्वरूपद्वयकल्पना ।।३२।।
दक्षिणेनाङ्गभागेन देव आदिगुरुर्मतः।
वामेनाप्यङ्गभागेन मायावीश्वर उच्यते ।।३३।।
दक्षिणेऽस्याक्षमाला तु लसत्यादिगुरोः करे।
आदिक्षांता द्विपंचाशद्वर्णास्तैरक्षमालिका ।।३४।।
यत्किञ्चिन्मंत्रजातं तत्सर्वं वर्णात्मकं मतं।
सबीजं सरहस्यं तन्मोक्षसाधनमुच्यते ।।३५।।
निगमागमसंभूतं गृहीतं दक्षिणे करे।
मुमुक्षुभ्योऽधिकारिभ्यो मंदेभ्यो दातुमेव तत् ।।३६।।
तत ऊर्ध्वकरे चापि डमरुर्दक्षिणे गुरोः।
मुमुक्षुभ्यो मध्यमाधिकारिभ्यो मोक्षहेतवे ।।३७।।

पूर्वपक्षादिरूपेण शब्दज्ञानप्रकाशकम्।
वेदादिशास्त्रं डमर्वायुधेन परिकल्पितम् ।।३८।।
नित्यानित्यविवेकाद्यैरुपायैस्तेन सर्वदा।
अनुगृह्णाति भगवान्मुमुक्षुभ्योऽपि मध्यमान् ।।३९।।
तत ऊर्ध्वकरेणात्तं तेन चक्रं सुदर्शनम्।
मुमुक्षुभ्योऽप्युत्तमाधिकारिभ्यः सद्य एव हि ।।४०।।
अज्ञानध्वान्तनाशेन मुक्तये सुतरां द्युमत्।
सुदर्शनं द्वादशारं गृहीतं निशितं दृढम् ।।४१।।
अविद्याकामकर्मात्मभववृक्षनिकृन्तनं।
कर्मबंधछेदनेनाऽऽवरणापगमेन च ।।४२।।
स्वात्मज्योतिःप्रकाशाय चक्रमेकमलं गुरोः।
एवं क्रमेण मोक्षोपयोगित्वाच्छ्रीगुरोरिदम् ।।४३।।
दक्षिणाङ्गं मुमुक्षूणां मोक्षायैव हि केवलम्।
मायावीशस्य वामाङ्गं कथ्यतेऽथ महेशितुः ।।४४।।
आपः कर्माणि यत्रालं कमंड्यन्ते कमंडलुः।
अधोगतेन सव्येन पाणिना स धृतः किल ।।४५।।
कर्मणां फलदानेऽतो न स्वातंत्र्यं मनागपि।
अतो व्यासः फलमत इत्यादि स्फुटमब्रवीत् ।।४६।।
जीवकर्मानुसारेण जीवान्नं दातुमीश्वरः।
करे जीवनसंपूर्णं दधौ वामे कमण्डलुः ।।४७।।
श्रुतिर्धाता यथापूर्वमिति प्राह यतस्ततः।
जीवानां कर्मणां चानादित्वं ज्ञेयं विचक्षणैः ।।४८।।
ब्रह्मैव सन्नयं जीवोऽब्रह्मत्वं मन्यते स्वयम्।
आत्मानं मायया देहतादात्म्याध्यासमेत्य सः ।।४९।।
शश्वज्जन्मादिसंसारभाक्तदर्थं हि जीवनम्।
तत्कुतं संभृतं पूर्णं तेन स्वीयकमंडलौ ।।५०।।

द्वितीयवामहस्ते तु त्रिशूलं निशितं द्युमत्।
सदाचारव्यवहृतिप्रायश्चित्तस्वरूपकम् ।।५१।।
जगतः स्थितिरेतेन कल्पिता परमात्मना।
पुंसां धर्मार्थकामाख्यत्रिवर्गोऽनेन सिद्ध्यति ।।५२।।
तृतीयवामहस्तस्थशंखो दिव्यो महारवः।
जगतः स्थितये तेन त्रिविधा कर्मचोदना ।।५३।।
अपूर्वादिस्वरूपात्र ज्ञापिता परमात्मना।
ततो जगच्चक्रमिदं बंभ्रमीतीश्वराज्ञया ।।५४।।
एवमीश्वरभागोऽयं जगत्स्थित्यै परेशितुः।
तथाऽन्यगुरुभागश्च मायाभ्रमनिवर्तकः ।।५५।।
एवंविधं श्रीभगवत्स्वरूपं मासि कार्तिके।
कृष्णपक्षे प्रतिपदि प्रपूज्यार्घ्याणि दापयेत् ।।५६।।
(अर्घ्याणि)**मायागुणविमुक्ताय सर्वलोकेश्वराय च।**
अत्रिवरदरूपाय कर्मणार्घ्यं ददाम्यहम् ।।५७।।(१)
अद्वैतानंदरूपाय मोहमायाश्रयाय ते।
अत्रिवरदरूपाय कर्मणार्घ्यं ददाम्यहम् ।।५८।।(२)
अव्यक्ताव्यक्तरूपाय निर्गुणाय गुणात्मने।
अत्रिवरदरूपाय कर्मणार्घ्यं ददाम्यहम् ।।५९।।(३)
एवमर्घ्यत्रयं दत्वा कदलीफलमर्पयेत्।
प्रीतोऽत्रिवरदोऽनेन स्वात्मानमपि दास्यति ।।६०।।
एवंविधोऽत्रिवरदाख्यावतारो द्वितीयकः।
दत्तात्रेयाख्यावतारस्तृतीयः प्रोच्यतेऽपरः ।।६१।।
इति अत्रिवरदाख्यो द्वितीयोऽवतारः।।



श्रीदत्तात्रेयषोडशावतारचरितानि।

अथ तृतीयचरित्रप्रारंभः।

।। श्रीगणेशाय नमः।। श्रीदत्तगुरुभ्यो नमः।।

भगवानत्रिवरदो वरदानाय चात्रये।
आविरासीत्स एवाह वरं वरय भो मुने ।।१।।
दुर्लभं त्रिषु लोकेषु यदलभ्यं दिवौकसाम्।
तत्ते नूनं प्रदास्यामि भक्त्याऽऽकृष्टोऽस्मि यत्त्वया ।।२।।
मद्भक्त्याप्यनसूयाया वशवर्ती यतस्ततः।
युवाभ्यां संप्रदास्यामि यदभीष्टं वृणीष्व तत् ।।३।।
इति श्रुत्वा भगवत उदारं वचनं मुनिः।
अनसूयामुखं वीक्ष्य सस्मितं प्राञ्जलिर्जगौ ।।४।।
न भूतले न पाताले न स्वर्गेऽन्यत्र वापि च।
वरणीयं ममास्त्येव यतः कामो न मेऽपरः ।।५।।
यदि प्रसन्नो भगवान्वरं दास्यति मे तदा।
देयो भवादृशः पुत्रो नान्यत्किमपि कांक्षितम् ।।६।।
तच्छ्रुत्वाऽत्रिवचो गूढं स्वगतं प्राह धीश्वरः।
दयाक्षमारूपगुणशीलौदार्यशमादिभिः ।।७।।
मत्समोऽस्त्यपरो नातो मुनेः पुत्रो भवाम्यहम्।
नोचेन्मे सत्यसंधत्वं नश्येदेव न संशयः ।।८।।
इति निश्चित्य भगवान्दंपत्योः पश्यतो सतोः।
सत्त्वप्रधानं स्वं रूपं धृत्वा प्राहात्रये स्मयन् ।।९।।
मयाऽहं तेऽत्रये दत्तस्त्वदधीनोऽस्मि सर्वथा।
इत्युक्त्वा बालभावेन दंपत्योः पुरतः स्थितः ।।१०।।
कार्तिके कृष्णपक्षे तु द्वितीयायां भृगोर्दिने।
मृगर्क्षे प्रथमे यामे मुहूर्ते प्रथमेऽपि च ।।११।।

आविरासीन्मुनेरग्रे दत्तात्रेयो दिगंबरः।
वरदानमृतं कर्तुं सर्वलोकैकमोहनः ।।१२।।
इन्द्रनीलप्रतीकाशश्चन्द्रवक्त्रश्चतुर्भुजः।
सर्वाङ्गरुचिरो देवः रूपनिर्जितमन्मथः ।।१३।।
शाण्डिल्योपनिषद्यस्य दत्तात्रेयस्य मङ्गलम्।
ध्यानमुक्तं समासेन तदिदं ध्यातृमङ्गलम् ।।१४।।
दत्तात्रेयं शिवं शांतमिन्द्रनीलनिभं प्रभुम्।
आत्ममायारतं देवमवधूतं दिगंबरम् ।।१५।।
भस्मोद्धूलितसर्वाङ्गं जटाजूटधरं विभुम्।
चतुर्बाहुमुदाराङ्गं प्रफुल्लकमलेक्षणम् ।।१६।।
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम्।
भक्त्यानुकम्पिनं सर्वसाक्षिणं सिद्धसेवितम् ।।१७।।
इत्यौपनिषदं रूपं ध्यात्वाऽत्रिर्जायया सह।
प्रणिपत्याह देवेशं भक्तकामदुघं प्रभुम् ।।१८।।
भगवान् भक्तभावज्ञ भावगम्य जनार्दन।
त्वयाऽऽत्मदानेमेतेन रूपेणेह कृतं खलु ।।१९।।
अथापि नावयोस्तृप्तिरौरसात्मजकांक्षिणोः।
अत एवौरसत्वं च समागच्छतु नौ भवान् ।।२०।।
एतत्सुमङ्गलं रूपं लोकोद्धाराय भूतले।
तिष्ठत्वत्र जगन्नाथ प्रसन्नो भव नौ प्रभो ।।२१।।
इत्यत्रिणाऽर्थितो देवो भगवानत्रिनन्दनः।
तथेत्यङ्गीचकाराजोऽव्ययोऽपि स्ववशोऽनघः ।।२२।।
अवतारस्तृतीयोऽयं दत्तात्रेयाभिधो विभोः।
संपूज्य विधिवद्दद्यादर्घ्याणि प्रीतये हरेः ।।२३।।
(अर्घ्याणि)**दत्ताय दिव्यरूपाय तेजोरूपनिवासिने।**
भक्तसंतापनाशाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।२४।।

अव्यक्ताद्वैतरूपाय निर्गुणाय गुणात्मने।
परब्रह्मस्वरूपाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।२५।।
मोक्षबीजाय मुक्ताय मुक्तनाथाय ते गुरो।
सच्चिदानंदरूपाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।२६।।
एवमर्घ्यत्रयं दत्वा देवं संप्रार्थ्य पूर्ववत्।
इक्षून्दद्यात्ततो देवः प्रीतो दास्यति चिन्तितम् ।।२७।।
तृतीयोऽस्यावतारोऽयं दत्तात्रयाभिधः स्मृतः।
चतुर्थः कथ्यतेऽथायं कालाग्निशमनाभिधः ।।२८।।

इति श्रीदत्तात्रेयाख्यस्तृतीयोऽवतारः।



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ चतुर्थचरितप्रारंभः

चतुर्थोऽवतारस्तु कालाग्निशमनाभिधः।
अनसूयात्रितपसः फलभूतोऽयमेव हि ।।१।।
निवृत्तस्तपसः सोऽत्रिर्जायया सह धर्मवित्।
निजाश्रमं समासाद्य ध्याननिष्ठोऽभवत्सदा ।।२।।
ततो बहुतिथे काले तापसोऽग्निर्मुनेस्तनौ।
कालाग्निवत्प्रववृधे दुष्प्रधर्षोऽतिदारुणः ।।३।।
सोऽन्तरङ्गं ददाहात्रेः सर्वज्ञो भगवान्प्रभुः।
ज्ञात्वा कारुणिकः शीघ्रं तच्छान्त्यै सहसा स्वयम् ।।४।।
यथात्मा मूर्धसीमानं भित्वा विशति चान्तरम्।
तथाऽत्रिमूर्धतः सोऽयं प्रविश्यांतः सुशीतलः ।।५।।
हृत्पुण्डरीके दहरे परमे व्योम्नि निर्मले।
कोटिचन्द्रप्रतीकाश आपादतलमस्तकम् ।।६।।
अत्रिमस्तकसंजातं कालाग्निं प्रशमय्य सः।
मुनिं सुखमयं कृत्वा तस्थौ शांतस्वरूपधृक् ।।७।।
ततोऽत्रिः शांतहृदयो नेत्रे उन्मील्य चाग्रतः।
अनसूयामृतुस्नातां लोभनीयतमाकृतिम् ।।८।।
पुत्रकामां महाभागां ददर्श तपसा ज्वलन्।
देदीप्यमानं नेत्राभ्यामत्रेस्तजो विनिर्गतम् ।।९।।
द्यावापृथिव्योः संधिं तद्व्याप्य लोकस्य पश्यतः।
अनसूयान्तरं वेगात्प्राविशत्पुण्ययोगतः ।।१०।।
मार्गशीर्षे सिते पक्षे सप्तम्यां शोभने दिने।
आविवेशानसूयायां गर्भभावं गतं तु तत् ।।११।।
नवभिर्दिवसैर्मासान्प्रकल्प्य नवमासिकः।
स्ववचःपालनार्थाय स्वभक्तानुजिघृक्षया ।।१२।।

अजोऽव्ययोऽपि सर्वात्माऽनसूयागर्भसंभवः।
अभवच्चित्रकृल्लोके मनसोऽविषयोऽपि यः ।।१३।।
अनसूया गर्भिणीति लोके चित्रं प्रदर्शितम्।
अयोनिसंभवो देवो मासि मासोत्तमे शुभे ।।१४।।
स्वविभूतौ मार्गशीर्षे सर्वलोकसुखावहे।
मनोहरे सुप्रसवे शुक्लपक्षे ज्ञवासरे ।।१५।।
प्रदोषे पूर्णिमायां भे मृगशीर्षभिधे शुभे।
पतत्सु पुष्पवर्षेषु देवमुक्तेषु नाकतः ।।१६।।
आविरासीज्जगन्नाथोऽनसूयातोऽतिमायिकः।
स्कांदोक्तो जन्मकालोऽयं पाद्मे यद्यपि चोच्यते ।।१७।।
मार्गे मासे सिते पक्षे चतुर्दश्यां बुधे दिने।
रोहिण्यां प्रथमे यामे ह्यवतीर्णो दिगंबरः ।।१८।।
पूर्वमुक्तं समासेन सप्तम्यां गर्भधारणम्।
ततः परं तिथेर्वृद्धिः श्रीदत्तोत्पत्तिवासरे ।।१९।।
साचतुर्दश्यौदयिकी साकल्यवचनाच्च सा।
प्रदोषकाले संगृह्य चतुर्दश्यां जनिः स्मृता ।।२०।।
तत्र तं पूजयेद्देवं कालाग्निशनाभिधम्।
आविर्भूतं जगत्त्रातुं दुर्वासश्चन्द्रसंयुतम् ।।२१।।
चन्द्रोऽभूद्ब्रह्मणोंऽशो दत्तो विष्णुस्तु योगवित्।
दुर्वासाः शंकरांशश्च ते त्रयोऽप्येकरूपकाः ।।२२।।
इत्थं मार्गेऽवतीर्णं तं यथाविभवविस्तरम्।
संपूज्य देवमर्घ्याणि प्रदद्यात्परितुष्टये ।।२३।।
(अर्घ्याणि)**अमायायात्मरूपाय कालाग्निशमनाय च।**
तोयतत्त्वनिवासाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।२४।।
ज्ञानानन्दैकदीपायानसूयानंदनाय च।
भक्तारिष्टविनाशाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।२५।।
निर्विकल्पाय शुद्धाय सिद्धाय परमात्मने।

मायागुणविमुक्ताय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।२६।।

एवमर्घ्यत्रयं दत्वा दद्यात्पंचामृतं सुधीः।

तत्प्रीतयेऽमृतरसद्रव्यं वा दापयेत्तदा ।।२७।।

दत्तात्रेयोऽवतु स्वीयान्कालाग्निशमनाभिधः।

बालभावं समाश्रित्य योऽनसूयापयोऽपिबत् ।।२८।।

इति कालाग्निशमनो नाम चतुर्थोऽवतारः



श्रीदत्तात्रेयषोडशावतारचरित्रानि

अथ पंचमचरितप्रारंभः

यदा दत्तावतीर्णोऽयं कालाग्निशमनाभिधः।
अत्रेर्गृहेऽवतीर्णो हि परमात्मा सनातनः ।।१।।
तं द्रष्टुमागतास्तत्र देवाश्च ऋषयोपि च।
गंधर्वाश्चारणाः सिद्धास्तथान्ये योगपारगाः ।।२।।
आत्मानं दर्शयामास भगवान्योगिवल्लभः।
अनादिनिधनो देवो योऽनसूयात्रिसंभवः ।।३।।
त्यक्त्वाऽर्भकस्वरूपं स तेषां संपश्यतां सताम्।
आविश्चकार भगवाञ्ज्योतीरूपं सनातनम् ।।४।।
साक्षिरूपं स्वयंज्योतिः प्रत्यक्त्वेनैव चिन्त्यताम्।
अनायासेन मोक्षः स्यादित्यदर्शयदात्मभूः ।।५।।
पूर्वरूपादन्यरूपं महातेजोयुतं विभुम्।
तस्मिन्संददृशुः सर्वे तं योगिजनवल्लभम् ।।६।।
देवादीन्विस्मितान्दृष्ट्वा तान्वागीशः प्रभुर्गिरा।
श्लक्ष्णया बोधयामास स्वमाहात्म्यं सनातनम् ।।७।।
न मे जन्म न मे कर्म न मे गर्भेऽपि संस्थितिः।
निर्गुणोऽजो निराकारो योऽस्मि सोऽस्मि यथा तथा ।।८।।
न मे देह कुतो कालः संभवोऽपि न संशयः।
मायागुणविमुक्तोऽहं भक्तानुग्रहकाम्यया ।।९।।
स्वरूपाज्जात इव च दर्शयामि स्वमायया।
स्वभक्ताननुगृह्णामि सर्वलोकसुखावहः ।।१०।।
यद्बालत्वं समाश्रित्य दर्शितं रूपमुत्तमम्।
तत्सर्वं लोकमोक्षाय चरितं विमलं मम ।।११।।
गच्छन्तु निर्जराः सर्वे ऋषयश्च ममाज्ञया।
सर्वात्मा सर्वगः साक्षी सर्वत्रावस्थितः प्रभुः ।।१२।।

असंगोऽहमनंतोऽहमद्वयः प्रभुरीश्वरः।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ।।१३।।
इत्यजत्वं चाक्रियत्वमसंगित्वं ममात्मनः।
तथैव भवतां ज्ञेयं नात्र कार्या विचारणा ।।१४।।
तच्छ्रुत्वा वचनं तस्य दत्तात्रेयस्य ते सुराः।
ऋषयः पितरः सर्वे स्वं स्वं स्थानमुपागमन् ।।१५।।
पंचमस्त्ववतारोऽयं यो योगिजनवल्लभः।
मार्गशीर्षे शुक्लपक्षे पौर्णिमायां गुरोर्दिने ।।१६।।
दिनमध्येऽवतीर्णोऽयं योगीन्द्रप्रियरूपधृक्।
संपूज्य विधिना देवं तमर्घ्याणि प्रदापयेत् ।।१७।।
(अर्घ्याणि)**योगारिष्टविनाशायानसूयानंदनाय च।**
दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।१८।।
योगविज्जननाथाय भक्तानंदकराय च।
दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।१९।।
विश्वेश्वराय सिद्धाय विश्वरूपधराय च।
पृथ्वीतत्त्वनिवासाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।२०।।
एवमर्घ्यत्रयं दत्त्वा दद्यान्मौक्तिकमुत्तमम्।
यद्वा भक्ष्यविशेषस्य दानं दद्यात्स्वशक्तितः ।।२१।।
सर्वेषामवताराणां सामान्यार्चनमुच्यते।
नाममंत्रो नमोऽन्तोऽत्र प्रणवादिः प्रकीर्तितः ।।२२।।
मंत्रात्मा मंत्रराजाय दत्तात्रेयाय ते नमः।।

इति श्रीवासुदेवानंदसरस्वतीविरचितं योगिजनवल्लभावतारकथनं
नाम पंचमावतारः।।



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ षष्ठचरितप्रारंभः।

।। श्रीगणेशाय नमः।। श्रीदत्तगुरुभ्यो नमः।।

अवतारो योगिजनवल्लभाख्योऽयमीरितः।
स एव योगिनां ध्येयः पूज्योऽभूद्योगसिद्धिदः ।।१।।
तेनैव रूपेण विभुर्योगिनां मंडले स्थितः।
योगिविघ्नान्निवार्याशु योगिनां गतिदोऽस्ति सः ।।२।।
कालाग्निशमनाख्यो यः सोऽनसूयाङ्कगोऽभवत्।
नानाकौतुककृत्साध्वीस्तन्यपानरतोऽभवत् ।।३।।
कदाचिद्दैववशतः संजाते देशविप्लवे।
ईतित्रस्ता हि मुनयो ऋषयोऽन्ये च मानवाः ।।४।।
अनसूयागर्भरत्नं दत्तात्रेयं दिगम्बरम्।
शरण्यं शरणं प्राप्ताः सर्वे दीनतरास्तदा ।।५।।
स्तन्यपानरतोऽपीशस्तेषां विक्लवितं वचः।
श्रुत्वा तेभ्योऽभयं दत्वा स्वसामर्थ्येन विश्वभृत् ।।६।।
अन्नपानादिदानेन लीलाविश्वम्भरोऽभवत्।
लीलया विश्वरूपाणि मुनिभ्यः स व्यदर्शयत् ।।७।।
तानि रूपणि दृष्ट्वा ते सर्वेऽपि गतसाध्वसाः।
साश्चर्यास्तुष्टुवुर्देवं लीलाविश्वम्भराभिधम् ।।८।।
लालीविश्वंभरः सोऽपि वेदाध्ययनतत्परः।
शिष्यानध्यापयामास कदाचिद्ध्यानतत्परः ।।९।।
वीक्ष्य तं तादृशं देवं नित्यं दर्शनलालसाः।
मुमुचुर्न महात्मानं संत्यज्याध्ययनादिकम् ।।१०।।
तेभ्यः कदाचित्सर्वेशः सुखदुःखसमन्वितम्।
प्रपञ्चं वनरूपेण दर्शयामास लीलया ।।११।।
अहंकारो महानद्रिर्व्यस्तपादपसंश्रयः।

कामो व्यात्तमुखः सिंहो मन्यवः कुपिताहयः ।।१२।।
जलाशयो मनोमोह आपोऽगाधा हि तत्र च।
क्रियायोगा हि ते वृक्षा निष्फलाः सफलाः क्वचित् ।।१३।।
इत्येवं दर्शयित्वाऽथ तानुवाच महेश्वरः।
इदं कालवनं कष्टं प्रायो दुःखकरं परम् ।।१४।।
आपातरमणीयानि दृष्टान्यत्र फलानि तु।
छाया विषमयी चापि पानीयं विषमेव हि ।।१५।।
कष्टदं दर्शनादेव किमु तत्सेवितं पुनः।
तस्मान्न स्थेयमत्राद्य भवद्भिः सद्धितेच्छुभिः ।।१६।।
इति श्रुत्वाऽपि तद्वाक्यं मोहविभ्रंशितान्तराः।
अश्रद्धाय फलासक्त्या समंतात्परिबभ्रमुः ।।१७।।
त्रितापदवतो दग्धाः कुपितैर्मधुपालिभिः।
एकान्ते पिबतो लुब्धान्मधु काप्यविवेकिनः ।।१८।।
तदा ते तिरोऽभवद्देवः सर्वे ते फललंपटाः।
इतस्ततः प्रधावन्तः केवलं क्लेशभागिनः ।।१९।।
उपपन्ने क्षये तत्र तदा ते सस्मरुः परम्।
पुनस्तत्र सुखं दृष्ट्वा क्षणादेव विसस्मरुः ।।२०।।
फलमाधुर्यसंसक्त्या त्यक्तेशस्मरणाः पुनः।
अवापुः सुतरां दुःखं विवेकपरिवर्जिताः ।।२१।।
तास्तादृशान्निरीक्ष्येशः करुणावरुणलयः।
किञ्चित्स्वाभिमुखान् ज्ञात्वा मायावनमलोपयत् ।।२२।।
तदा दत्तमदृष्ट्वा ते शुशुचुर्विरहार्दिताः।
तदा प्रादुरभूद्देवः स्वरूपेणाम्बरे स्थितः ।।२३।।
तदा ते चकिता ऊचुर्भगवन् क्व गतं वनम्।
दत्तात्रेयः स भगवान् प्रहस्याह कुमारकान् ।।२४।।
यत एव समुत्पन्नं तस्मिन्नेव लयं गतम्।
एवमेव हि संसारो नात्र कार्या विचारणा ।।२५।।

तस्मात्तं दुःखदं त्यक्त्वा यः सदा मत्परो भवेत्।
तत्स्थोऽपि तदसारज्ञ आत्मज्ञानाद्विमुच्यते ॥२६॥
त ऊचुर्भगवन्नात्मा कस्तज्ज्ञानं कथं भवेत्।
वयं तु साधनैर्हीना दीना नो भगवान् गतिः ॥२७॥
श्रीदत्त आह सर्वेषामन्तरात्माऽहमेव हि।
मज्ज्ञानं कर्मणा भक्त्या ज्ञानेन परिमुच्यते ॥२८॥
त ऊचुर्भगवन्देव कथं नो मुक्तिरीदृशाम्।
ज्ञानेन कर्मणा भक्त्या हीना दीना वयं तव ॥२९॥
त्वया सह चरिष्यामो नित्यं त्वद्दर्शनोत्सुकाः।
त्वां त्यक्तुमक्षमास्तस्मात् प्रसीद करुणां कुरु ॥३०॥
इति तन्निश्चयं ज्ञात्वा कथं यास्यन्त्यमी गृहान्।
संगो हि योगभंगाय तस्मादेवं करोम्यहम् ॥३१॥
एवं विचार्य भगवान्निममज्ज सरोवरम्।
तत्रापि ते सरस्तीरे तस्थुः सर्वे शतं समाः ॥३२॥
ततस्तद्वञ्चनार्थाय नारीं मायामयीं वराम्।
गृहीत्वा पाननिरतामुत्ततार जलात्प्रभुः ॥३३॥
स्त्रीसंसर्गिणं मामेते त्यजेयुरिति तेऽपि तम्।
सुरापानरतं नार्याऽऽलिङ्गितं तं न तत्यजुः ॥३४॥
तेजीयसां न दोषायेत्येवं निश्चित्य केचन।
भक्तिमतो भगवताऽनुगृहीतास्त एव हि ॥३५॥
संयोगो वा वियोगो वा कथं सर्वात्मनो भवेत्।
अथापि लोकशिक्षार्थं दर्शयत्येवमीश्वरः ॥३६॥
संगात्संजायते कामस्ततः क्रोधादयोऽघदाः।
शोकमोहादयः सर्वे संगादेव भवन्ति हि ॥३७॥
योगभंगकरः संगः प्रतिकूलोऽविवेकिनाम्।
विवेकिनां तु सत्संगः सर्वदा योगसिद्धिदः ॥३८॥

यत्नात्त्याज्यो बहिःसंगः संगस्त्याज्यस्तथान्तरः।

इत्युपादिशदीशोऽयं लीलाविश्वंभरो विभुः ।।३९।।

पौषमासे पूर्णिमायां पुष्यर्क्षे बुधवासरे।

स सूर्योदयवेलायामवतीर्णो महाद्युतिः ।।४०।।

श्रद्धाभक्त्या तमभ्यर्च्य यथाविभवविस्तरम्।

त्रीण्यर्घ्याणि प्रदेयानि योगिवल्लभतुष्टये ।।४१।।

(अर्घ्याणि)**पूर्णब्रह्मस्वरूपाय लीलाविश्वंभराय च।**

दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।४२।।

अद्वैतानन्दरूपाय विश्वरूपाय शंभवे।

अन्नमयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।४३।।

लीलाविग्रहरूपायानसूयानंदनाय च।

संसारश्रमनाशाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।४४।।

एवमर्घ्यत्रयं दत्वाऽन्नं दद्यात्तस्य तुष्टये।

तेन तुष्टोऽभिलषतं लीलाविश्वंभरोऽर्पयेत् ।।४५।।

इति श्रीवासुदेवानंदसरस्वतीविरचित लीलाविश्वंभराख्य-
षष्ठावतारवर्णनं नाम षष्ठोऽध्यायः।।



श्रीदत्तात्रेयषोडशावतारचरित्रानि

अथ सप्तमावतारचरितप्रारम्भः

।। श्रीगणेशाय नमः।।   ।। श्रीगुरुचरणारविंदाभ्यां नमः।।

लीलाविश्वंभरस्यैव चरितं प्रोक्तमुत्तमम्।
सिद्धराजस्य चरितमथ वक्ष्ये समासतः ।।१।।
लीलाविश्वंभरो देवः कदाचित्पर्यटन्निजम्।
रूपमाच्छाद्य बदरीवनं प्राविशदेककः ।।२।।
परिभ्रमंस्तत्र लीलाविश्वंभरो विभुः।
तत्रासन् बहवः सिद्धाः क्लेशसाधितसिद्धयः ।।३।।
सिद्धिसामर्थ्ययोगेन कामक्रोधपरायणाः।
केचिन्नग्ना अनग्नाश्च मौनिनोऽमौनिनस्तथा ।।४।।
ध्यानस्था आसनस्थाश्च सदसद्वादवादिनः।
तान्दृष्ट्वा भगवांस्तेषां प्रभावं संपरीक्षितुम् ।।५।।
दिव्यरूपः पृष्ठभागे तेषामुपविवेश ह।
तं योगमुद्रयाऽऽसीनं कुमारं सुमनोहरम् ।।६।।
दृष्ट्वोचुः कस्त्वमिति तान् स च प्राह महामतिः।
अप्रतीतस्वरूपोऽहमिति कस्ते वदाश्रयः ।।७।।
निराश्रयो ह्यनाथोऽहं कस्ते योगः कथं क्रिया।
अक्रियश्चित्रयोगोऽहमिति कस्ते गुरुर्वद ।।८।।
स प्राह मे गुरुर्नास्ति का ते मुद्रा वदाधुना।
स प्राह मम मुद्रेयं मायातीता निरञ्जनी ।।९।।
किं पश्यसीति यद् दृश्यं तद्वै पश्यामि सर्वतः।
किं ते ध्येयमिति ध्यानाभावगम्यं यदस्ति तत् ।।१०।।
कस्ते मार्गः सुखं येन गम्यते सुशकः शिवः।
अन्येन येन गन्तुं न शक्यं मार्ग स एव मे ।।११।।

एवं विवदतां तेषां तावदाकाशमार्गतः।
रुद्राश्च वसवश्चैवादित्याश्च मरुतस्तथा ।।१२।।
महर्षयश्च साध्याश्च यक्षगंधर्वकिन्नराः।
अवसन्ना गतिस्तेषां भूमौ संपेतुरग्रतः ।।१३।।
योगसिद्धिफलं नोऽस्तु यद्देवपतनं भुवि।
मम सिद्धिफलं चैतन्मम सिद्धिफलं त्विति ।।१४।।
वयं श्रेष्ठा वयं श्रेष्ठा इत्थं विवदिरे मिथः।
तान्दृष्ट्वोवाच सिद्धेशो भगवानत्रिनंदनः ।।१५।।
विवादं मा कृथा व्यर्थं सिद्धाः शृणुत मे मतम्।
यस्यैते वचनादेव पुनर्यास्यन्ति देवताः ।।१६।।
तेनैव कुंठितास्तस्मात्सर्वश्रेष्ठः स एव हि।
इत्युक्तास्ते तथेत्युक्त्वा प्रोचुः सिद्धाः पृथक् पृथक् ।।१७।।
प्रयान्तु खेचरा भूयो ममैव वचनादिति।
न तदा गमनं तेषां बभूवातीव लज्जिताः ।।१८।।
अभूवन्विगतक्रोधा बभूवुर्निरहंकृताः।
निस्तंभांस्तान्समालोक्य दत्तः सिद्धेश्वरोऽब्रवीत् ।।१९।।
प्रयान्तु खेचरा भूयो वचसा मे क्षणादिति।
तत्क्षणादेव ते सर्वे विमुक्तगतयः सुराः ।।२०।।
सर्वे यथागतं जग्मुर्विस्मिता अभवन् हि ते।
ततस्तं परमात्मानं ज्ञात्वा भक्तिपुरःसराः ।।२१।।
अभिष्टूय महात्मानं नमस्कृत्य पुनः पुनः।
प्रमोदाविष्टमनसः सर्वे देवा ययुर्दिवम् ।।२२।।
तदाश्चर्यं समालोक्य श्रुत्वा देवमुखात्स्तवम्।
ज्ञात्वा तं पूर्णपुरुषं दत्तं सिद्धा ववंदिरे ।।२३।।
ततस्तान् स्वपरान् सिद्धान् प्रशांतान्निरहंमतीन्।

स्वस्मिन् भक्तियुतान् दृष्ट्वा दत्तात्रेयोऽब्रवीदिदम् ।।२४।।
अहं सिद्धः परो योगी परमात्माऽऽत्मभूः स्वयम्।
देवदेवो जगन्नाथः कालाग्निशमनो हरिः ।।२५।।
सर्वात्मा सर्ववित्साक्षी मतो वः परमेश्वरः।
शिवं भवतु सर्वत्र सर्वतो मत्प्रसादतः ।।२६।।
प्रसन्नोऽहं प्रवक्ष्यामि यदिष्टं तद्वृणीष्व मत्।
सर्वसिद्धिप्रदं सोऽहं सिद्धिभूः सकलाश्रयः ।।२७।।
एवं सिद्धिराजस्य सुप्रसन्नस्य योगिनः।
वचनं सिद्धिकामास्ते श्रुत्वा तदिदमब्रुवन् ।।२८।।
यदि नस्त्वं प्रसन्नोऽसि देवदेव जगद्गुरो।
कृपया परया युक्तः सुपुत्राय यथा पिता ।।२९।।
अनंतसिद्धिदं योगं परसिद्धिहरं परम्।
त्वत्समं ब्रूहि सर्वज्ञ त्वयि भक्तिं सनातनीम् ।।३०।।
इत्येवं प्रार्थितः सिद्धैः सिद्धेशो भगवानजः।
उवाच तानिदं वाक्यं दत्तात्रेयो जगद्गुरुः ।।३१।।
मत्सामर्थ्यप्रदो योगो न भूतो न भविष्यति।
परसिद्धिहरश्चैव न तत्सिद्धिकरः पुनः ।।३२।।
परसिद्धिहरोऽन्ये को मत्तोऽत्र परमात्मनः।
अनेकशक्तिमान् कर्ता दाता धाताऽक्षरोऽव्ययः ।।३३।।
सिद्धाः शृणुत मे सर्वे योगं तं कथयाम्यहम्।
यथाऽहमीश्वरः साक्षात् परमानन्दसागरः ।।३४।।
तथैव मंत्रराजोऽहं नादरूपोऽव्ययः शिवः।
मदधीनं जगत्सर्वं मंत्राधीनोऽहमेव हि ।।३५।।
मंत्रोऽहं मंत्रगम्यात्मा मंत्राकारो निरामयः।
स एव मंत्रराजोऽहमचिन्त्योऽनन्तशक्तिदः ।।३६।।
परसिद्धिहरं चात्मशक्तिदं वच्मि वो मनुम्।

इत्युक्त्वा मंत्रजालं तान् स प्राहानंतशक्तिदम् ।।३७।।
सरहस्यं सविन्यासं ग्रहणादेव सिद्धिदम्।
माघमासे पूर्णिमायां मघायां गुरुवासरे ।।३८।।
दिवैव संगवस्यान्ते सिद्धशस्तानुपादिशत्।
सिद्धराजागमः सोऽभूत्सांगमंत्रश्च सक्रियः ।।३९।।
भोगमोक्षप्रदः शीघ्रं न देयोऽनधिकारिणाम्।
सिद्धराजस्य तां मूर्तिं विचित्रां ध्यानमंगलाम् ।।४०।।
माघे मासि प्रकटितामानर्चुस्ते सुभक्तितः।
सिद्धराजोऽयमस्माकं देवतेति सुभक्तितः।।
संपूज्य विधिवद्दद्युस्त्रीण्यर्घ्याणि महात्मने ।।४१।।
(अर्घ्याणि)**सर्वसिद्धांतसिद्धाय देवाय परमात्मने।**
सिद्धराजाय सिद्धाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।४२।।
संसारदुःखनाशाय सर्वशोकहराय च।
सिद्धराजाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।४३।।
सवर्णज्ञानदीपाय सर्वशक्तिधराय च।
सिद्धराजाय शांताय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।४४।।
एवमर्घ्यत्रयं दत्वा प्रदद्युः पुस्तकं शुभम्।
यथोपदेशं ते सिद्धाः सिद्धराजपरायणाः ।।४५।।
कालेनाल्पेन ते सिद्धिं प्रापुर्दत्तप्रसादतः।
एवं यः पूजयेत् सोऽपि तद्वत् सिद्धिं समाप्नुयात् ।।४६।।

इति श्रीमद्वासुदेवानंदसरस्वतीविरचितसिद्धराजावतारो नाम सप्तमोऽध्यायः।।



श्रीदत्तात्रेयषोडशावतारचरित्रानि

अथ अष्टमावतारचरितम्।

कस्मिंश्चिदथ काले स दत्तात्रेयो महामुनिः।
निरीक्ष्य तांस्तथा सिद्धान्निजात्मनि व्यचारयन् ।।१।।
कामः कारयिता कर्ता मन्युश्चैव तथाऽपरः।
स्वतंत्रत्वं कुतस्तस्य जनस्यास्य विचारतः ।।२।।
कामाधीनं जगत्सर्वं वर्तते सस्पृहं तथा।
चिन्तया परया व्याप्तं तापत्रयविकंपितम् ।।३।।
कामो हि नरकद्वारं दुःखदः पापसंग्रहः।
सर्वानर्थकरः सर्गे भ्रमकः सर्वपीडकः ।।४।।
कामे पुष्टेऽनर्थपुष्टिः पुष्टेऽनर्थे जगत्क्षयः।
अतः परं करिष्यामि काममुक्तमिदं जगत् ।।५।।
मम सायुज्यसंप्राप्तं ज्ञानादेव न संशयः।
इति मत्वा दयालुत्वात्परमात्माऽत्रिसंभवः।
तत्पूर्वरूपमासाद्य गुणातीतं स्वभावतः ।।६।।
ज्ञानयोगयुतं मुक्तस्वभावं सहजस्थितिम्।
संप्राप्तमिव सादृश्यं ज्ञानिरूपमधारयत् ।।७।।
फाल्गुने मासि शुक्लायां दशम्यां रविवासरे।
भास्करस्योदये चैव पुनर्वस्वृक्षसंयुते ।।८।।
गत्वाऽथ समितिं तेषां सिद्धानां मूर्धसंमिते।
पुरस्तादुच्चके देशे स्थाने व्योमन्युपाविशत् ।।९।।
ततस्तमुच्चके स्थाने स्थितं व्योम्नि प्रभाविणम्।
दृष्ट्वा प्रकृष्य तत्सिद्धिहाने ववृतिरे भृशम् ।।१०।।
तथापि तस्य तेनेषन्मुद्राभंगोऽपि नाभवत्।
ततश्चेश्वरसामान्यसिद्धियोगबलाद्विभुम् ।।११।।

चालयामासुरीशस्य न किञ्चिदपि सोऽभवत्।
यथा वायुविघातेन न चचाल महागिरिः ।।१२।।
इत्युत्कृष्टप्रभावं तं ज्ञात्वा सर्वेऽपि विस्मिताः।
प्रपच्छुः कस्त्वमित्येवं सोऽब्रवीत्पूर्ववत्पुनः ।।१३।।
अप्रतीतस्वरूपोऽहमिति संस्मृत्य सोथ किम्।
भवेद्वा नेति संशय्य पुनः पप्रच्छुरादरात् ।।१४।।
कस्तवास्त्याश्रयो नाथो ह्यनाथोऽहमनाश्रयः।
कस्ते योगः क्रिया का च का च विद्येत्यमूलकाः ।।१५।।
कस्तवास्ति गुरुस्त्राता न मे त्राता तथा गुरुः।
का ते मुद्रेति मायेति किं पश्यसि यदीक्ष्यते ।।१६।।
किं ते ध्येयमिति ध्यानाभावगम्यं यदस्ति तत्।
कस्ते मार्गो जना येन न गच्छन्ति स एव मे ।।१७।।
इत्येतैर्वचनैस्तस्य स एवायं परेशिता।
इति निश्चित्य तं मत्वा तेऽप्राक्षुर्विचिकित्सितम् ।।१८।।
हे देव सर्वदेवेश दीननाथ जगत्पते।
त्वत्प्रसादाद्वयं सर्वे तव शक्तिमुपागताः ।।१९।।
तव शक्तिबलात्तस्मान्न विचाल्य स्थिरो यदा।
तदा हि कथमस्माकं त्वत्समानत्वमच्युत ।।२०।।

श्रीदत्तात्रेय उवाच

सर्वभूतगतो वायुर्यथा सर्वस्य चेष्टकः।
सोऽपि संचालने व्योम्नो नैव शक्नोति सर्वथा ।।२१।।
सर्वावयवशून्यत्वात् कारणात्वाद्यथाम्बरम्।
न चलत्यनिलाघातात्तथाऽहं चात्ममायया ।।२२।।
कारणात्वान्निर्गुणत्वान्निराकारो निरामयः।
सर्वत्रावस्थितो देहे सर्वसंस्पर्शवर्जितः ।।२३।।
अबाध्यः सर्वभूतात्मा मायाधारो निराश्रयः।
नित्यानन्दमयं ब्रह्म सर्वसंगविवर्जितम् ।।२४।।

नैवोत्पत्तौ समुत्पन्नः स्थितौ च न स्थितः कदा।
न चैव प्रलये नाशः सत्यरूपस्य मे सदा ।।२५।।
ब्रह्मैवाहं परं सत्यं शुद्धमद्वयमक्षरम्।
सर्वशून्यमशून्यं च माययाऽनावृतं सदा ।।२६।।
ईश्वरत्वमसद्यत्र सिद्धानां तत्र का कथा।
विफलाभ्याससंसक्ता भवन्तः काममोहिताः ।।२७।।
कामो वा कारणं संगे दुःखायैव सुखाय च।
कामो हि नरकस्येदं द्वारं मोहनमात्मनः ।।२८।।
कामात् क्रोधस्य संचारः क्रोधाच्च स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्दुष्टकर्म ह्यन्याय्यं नरकप्रदम् ।।२९।।
सिद्धियोगबलादेव नरकाराधनं महत्।
न चैव मम संप्राप्तिर्न सुखं न परा गतिः ।।३०।।
सर्वकामविनिर्मुक्तः सर्वसंकल्पवर्जितः।
धीरो यथा तथा स्वस्थश्चालितोऽपि न चञ्चलः ।।३१।।
आत्माऽहं सर्वभूतस्थः सर्वदा संगवर्जितः।
धीरो यथा स्वस्थश्चालितोऽपि न चञ्चलः ।।३२।।

सिद्धा ऊचुः

गुरो त्रायस्व देवेश देवदेव रमापते।
न जानीमो यथार्थं त्वन्माहात्म्यं वयमव्ययम् ।।३३।।
शत्रुः कामो मनुष्याणामज्ञानामल्पमेधसाम्।
इति ज्ञातं यथार्थत्वं त्वत्प्रसादात् सुवाक्यतः ।।३४।।
मोचयस्व जगन्नाथ गुरो कामविबंधनात्।
तदेकं वद निश्चित्य येन मुक्तिर्भविष्यति ।।३५।।

ज्ञानसागर उवाच

ममैवाराधनं कार्यं सर्वेषां नात्र संशयः।
विहितेन मया पूर्वं मंत्ररूपेण कर्मणा ।।३६।।
फलसंगपरित्यागात् कामक्रोधादिवर्जनात्।

मद्भक्त्या मत्पदप्राप्तिर्न युक्त्यैवेति निश्चितम् ।।३७।।

इति तत्त्वोपदेशेन त आत्मज्ञानसाधने।

प्रेरिता मंत्ररूपेण स्वात्माराधनकर्मणि ।।३८।।

(अर्घ्याणि)**सर्वत्राज्ञाननाशाय ज्ञानदीपाय चात्मने।**

सच्चिदानन्दबोधाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।३९।।

भेदत्रयविनाशाय मोक्षबीजाय चात्मने।

ज्ञानप्रियाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।४०।।

भक्तारिष्टविनाशाय विज्ञानसागराय च।

दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।४१।।

एवमर्घ्यत्रयं दत्वा कर्तव्यं मंदिरार्पणम् ।।४२।।

इति श्रीज्ञानसागरचरित्रवर्णनं नाम अष्टमोऽध्यायः।।



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ नवमावतारचरितम्।

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।

ततो बहुतिथे काले मंत्रानुष्ठानकारिणाम्।
तेषामेवात्मभक्तानां क्रियाः सम्यक्परीक्षितुम् ।।१।।
तत्पूर्वरूपमाच्छाद्य मलीमसमिवाक्रियम्।
अब्रह्मरूपमपरमवधूतं व्यधारयत् ।।२।।
गत्वा ततस्तत्समाजं मदांध इव दूरतः।
अपश्यच्चरितं तेषामासीनो ध्यानमुद्रया ।।३।।
तदा केचिद्गता वृत्तिलयं विक्षिप्तमानसाः।
केचित्संतापसंयुक्ता आसंस्त्रस्ताश्च केचन ।।४।।
ग्राम्यवादरताः केचिद्बद्धाहंकृतयस्तथा।
कामक्रोधादिसंदुष्टस्वभावविहिताः परे ।।५।।
पूर्वाभ्यस्तध्यानबलाद् ध्यानस्थाः केचनापरे।
केचनानेकसंदेहसागरे पतितास्तथा ।।६।।
तान्दृष्ट्वा परमात्मा स दत्तात्रेयो दयाकरः।
तेषां योगविरुद्धानि चित्तानि समुपाहरत् ।।७।।
तेन ते हृतचेतस्काः स्तब्धा आत्मक्रियासु च।
तत्परित्यागतोऽभवंस्तदेकतानबुद्धयः ।।८।।
अन्वासीनास्तमासीनं व्रजन्तमनुयायिनः।
तिष्ठन्तमनुतिष्ठन्तस्ते छायेव तमन्वगुः ।।९।।
इत्यात्ममायया तेषां मोहितानां परेशिता।
बुद्धीरात्मरताः कृत्वा पुनस्ताः प्रमुमोच ह ।।१०।।
ततस्ते योगसंभ्रष्टाः सर्व एतेन नो भृशम्।
मोहितं चित्तमित्येव ज्ञात्वा संक्षुब्धमानसाः ।।११।।

छलवादप्रसंगेन जेतुकामास्तमीश्वरम्।
पप्रच्छुः कस्त्वमित्येवं सोऽब्रवीत्पूर्ववत्पुनः ।।१२।।
अप्रतीतस्वरूपोऽहमित्ययं पूर्व एव हि।
भवेद्वा नेति संदिह्य तमप्राक्षुस्तथा पुनः ।।१३।।
तथैव तद्वचः श्रुत्वा स एवायं परेशिता।
इति निश्चित्य ते सर्वे प्रणिपेतुर्मुहुर्मुहुः ।।१४।।
जयेति शब्दमुच्चार्य स्तुत्वा सुस्तुतिभिस्तथा।
श्रद्धया परयोपेतास्तमिदं वाक्यमब्रुवन् ।।१५।।
हे दत्त करुणामूर्ते गुरो संदेहनाशन।
कृपया पाहि देवेश शरणागतवत्सल ।।१६।।
मंत्रयोगस्त्वया प्रोक्तः साकल्येन सुदुष्करः।
अस्य योगस्य विक्षेपान्न पश्यामः स्थितिं स्थिराम् ।।१७।।
गुणतश्चञ्चलं चित्तं तद्धावति पिशाचवत्।
देहे बद्धासने बद्धे मुद्रामालापरिग्रहात् ।।१८।।
योगेनानेन सा सिद्धिर्भविष्यति कथं पुनः।
अतस्त्रायस्व योगेश योगाभ्यासेऽतिदुर्बलान् ।।१९।।
तच्छ्रुत्वा वचनं तेषां दत्तात्रेयः कृपाम्बुधिः।
चैत्रशुक्ले पौर्णिमायां चित्रर्क्षे भौमवासरे ।।२०।।
द्वितीययामे प्रथमे प्रहरे प्रादुरास सः।
आच्छाद्य पूर्वरूपं तदात्मानं विश्वरूपिणम् ।।२१।।
नानावर्णमनेकाङ्घ्रिं बहूदरकरं तथा।
बहुवक्त्रश्रोत्रनेत्रग्रीवं सज्योतिषं परम् ।।२२।।
विश्वस्यास्याप्ययोत्पत्तिस्थित्यधिष्ठानमुत्तमम्।
दर्शयामास तेनैव रूपेणोवाच तानिदम् ।।२३।।
निर्गुणोऽहं निराकारः सर्वव्यापी निरञ्जनः।
नित्यानन्दमयं ब्रह्म स्वभावाद्गुणवर्जितः ।।२४।।

अहं मायाश्रयः साक्षी गुणद्रष्टा गुणात्मकः।
सर्वसंगविहीनात्मस्वभावात्तत्र का क्रिया ।।२५।।
सर्वाभासे निराभासः सर्वमंत्रमयः सदा।
स्वभावात्सर्वनिर्मुक्तः क्रियाभिस्तत्र किं पुनः ।।२६।।
ममानुस्मरणान्मुक्तिर्ममानुस्मरणाद्गतिः।
ममानुस्मरणाज्ज्ञानं भविष्यति न संशयः ।।२७।।
ममानुस्मरणं कार्यं प्रीत्या च निश्चयेन च।
सर्वेषां मम भक्तानां निर्वाणयोगसिद्धये ।।२८।।
मंत्रराजं तु मां ध्यात्वा मंत्रबीजाक्षरात्मकम्।
यः करोति ममासक्त्या स्मरणं स सुखी नरः ।।२९।।
अहमेवाव्ययं बीजमभिधान समन्वितम्।
तस्मान्मंत्रोऽहमात्मा वै मां हि ध्यायन्तु योगिनः ।।३०।।
मंत्रागमस्वनुष्ठानयोगसंसाधनक्षमान्।
सुभक्तान् सुकरं त्वेवं भक्तिमार्गमुपादिशत् ।।३१।।
ममानुस्मरणादेव प्रेमनिश्चयसंयुतान्।
मुक्तिं दास्यामि भक्तानां नानृतं मे प्रभाषितम् ।।३२।।
इत्थं प्रतिज्ञाय शुभैर्वचोभिराच्छाद्य तद्विश्वमयं स्वरूपम्।
भूत्वा पुनःपूर्ववपुर्महात्मा तत्संनिधावेव तिरोबभूव ।।३३।।

(अर्घ्याणि)**विश्वंभराय देवाय भक्तप्रियकराय च।**
भक्तप्रियाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।३४।।
सर्वाज्ञानविनाशाय द्वंद्वतापहराय च।
योगश्रमविनाशाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।३५।।
नामप्रियाय देवाय योगसंस्थापकाय च।
सर्वोत्तमाय सिद्धाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।३६।।
एवमर्घ्यत्रयं दत्वा कुर्याद्गोदानमुत्तमम् ।।३७।।

इति श्रीविश्वंभरावधूतचरितवर्णनं नाम नवमावतारः।।



श्रीदत्तात्रेयषोडशावतारचरित्रानि

अथ दशमावतारचरितम्।

।। श्रीगणेशाय नमः।। श्रीसद्गुरवे नमः।।

कस्मिंश्चिदथकाले स भक्तानां परमेश्वर।
प्रेमनिश्चययुक्तानां भावं सम्यक्परीक्षितुम् ।।१।।
माधवस्य चतुर्दश्यां शुक्लायां बुधवासरे।
स्वात्यृक्षयुक्ते माध्याह्ने व्यक्तः स लोकपावनः ।।२।।
अब्रह्मभिक्षुरूपेण नाम्ना शीलस्य धीमतः।
कस्यचिद्द्विजवर्यस्य श्राद्धकालेऽगमद्गृहम् ।।३।।
शुद्धकाञ्चनसंकाशो द्विबाहुरतिसुंदरः।
तारुण्यमदसंपूर्णः कौपीनं छादनं दधन् ।।४।।
भिक्षापात्रं च दण्डं च वामदक्षिणहस्तयोः।
शुद्धचंदनसंमिश्रभस्मलिप्तकलेवरः ।।५।।
सहायी यायिना पश्चाच्छुना कृष्णेन वै युना।
गत्वा तन्मंदिरे तस्थावकस्मात्पात्रमण्डले ।।६।।
तं दृष्ट्वा ब्राह्मणाः सर्वे क्रोधावेशसमन्विताः।
कस्त्वमित्येव पप्रच्छुर्धिक्कारेणातिनिष्ठुराः ।।७।।
अप्रतीतस्वरूपोऽहमित्येवं सोऽब्रवीत्तदा।
तत्तस्य वचनं श्रुत्वा स्मृत्वा पूर्वचेष्टितम् ।।८।।
स एवायं भवेद्वा नो इति संदिग्धमानसाः।
तत्स्वरूपं विनिश्चेतुं शीलः पप्रच्छ पूर्ववत् ।।९।।
कस्तवास्त्याश्रयो नाथ इत्यादि सोऽब्रवीत्पुनः ।
अनाश्रयो ह्यनाथोऽहमित्यादिवचनं विभुः ।।१०।।
तेन तद्वचसा शीलं विज्ञायात्मनो गुरुम्।
बहुकृत्वो नमस्कृत्वा स्तुत्वा सम्यगपूजयत् ।।११।।

संकल्पिताभिरद्भिस्ततपादो प्रक्षाल्य धर्मवित्।
कुशपुष्पसमायुक्ता अर्घ्यास्तावा अथाकरोत् ।।१२।।
सुगंधसुमनोधूपदीपप्रभृतिभिर्मुदा।
उपचारैः समभ्यर्च्य श्राद्धार्थान्नं न्यवेदयत् ।।१३।।
तस्य पात्रेऽथ प्रक्षाल्य मुखपाणिपदाम्बुजम्।
दत्वा तांबूलमष्टाङ्गं दीपैस्तं निरराजयत् ।।१४।।
तयोस्तच्चरितं दृष्ट्वा क्रोधेन महता युताः।
कृत्वा कोलाहलं विप्रा मंदिरान्निर्ययुर्बहिः ।।१५।।
तान्दृष्ट्वान्येऽपि भूयांसो ब्रह्मणा मिमिलुस्तदा।
आश्चर्यं किमिदं चेति तद्ग्रामेऽन्येऽपि संगताः ।।१६।।
इति ते मिलिताः सर्वे गत्वा तन्मंदिरं शुभम्।
ब्राह्मणास्तं भिक्षुरूपमप्राक्षुस्तीव्रया गिरा ।।१७।।
रे दुष्ट वर्णहीनस्त्वं कथमत्रागतोऽसि वै।
ब्रह्मकर्मविनाशाय कस्ते वद पराक्रम ।।१८।।

भिक्षुरुवाच

किं तद्ब्रह्म कथं कर्म विप्राः सर्वे वदन्तु मे।
तदहं नैव जानामि जानाम्यात्मानमात्मना ।।१९।।

विप्रा ऊचुः

ओमित्येकाक्षरं ब्रह्म वेदरूपेण विस्तृतम्।
तेनेदं विहितं कर्म नित्यनैमित्तिकात्मकम् ।।२०।।

भिक्षुरुवाच

वेदं नैव हि जानामि किं तेन विहितं पुरा।
प्रब्रूत मेऽग्रतः सर्वं साङ्गोपाङ्गं विवेकतः ।।२१।।

विप्रा ऊचुः

एकश्चतुर्विधःप्रोक्तो वेदोऽयं वेदवादिभिः।
न वेदस्याधिकारस्ते श्रवणे धर्मवर्जित ।।२२।।

वर्णाश्रमविनष्टस्य कर्मभ्रष्टस्य सर्वदा।
न ते वेदाधिकारोऽस्ति वदिष्यामः कथं वयम् ।।२३।।

भिक्षुरुवाच

न मे वेदेऽधिकारोऽस्ति मायामुक्तस्य सर्वदा।
गुणत्रयात्मकं कार्यं न श्ववत्संस्पृशाम्यहम् ।।२४।।
गुणत्रयात्मकः सर्ग एव श्वा कल्पितो मया।
कृष्णो मायामयत्वाच्च न स्पृशाम्येनमात्मवान् ।।२५।।
चतुर्वेदधरश्चायं सर्वकर्मविशारदः।
वेदव्याख्यानविद्वक्ता स तानिह वदिष्यति ।।२६।।
इत्युक्त्वा पुरतः सर्वब्रह्मणानां स दूरगम्।
श्वानं तं चोदयामास पठ वेदान् क्रमादिति ।।२७।।
स वेदान् चतुरः साङ्गान् सूत्राणि च पृथक्पृथक्।
पपाठ धर्मशास्त्राणि सर्वव्याकरणानि च ।।२८।।
तेन प्रकाशिता वेदाः स्वरवर्णविभागतः।
सूत्राणि च सर्वाणि ये लोकमागमन् पुरा ।।२९।।
पितृन् शीलस्य तत्काले संक्षिप्यात्मन्यथो पुनः।
संप्रदाये समायुञ्जन् स शीलायाधिकारिणे ।।३०।।
आत्मज्ञानाधिकारे हि निर्जगाम ततो विभुः।
तद्दृष्ट्वाऽयं पुमान् पूर्ण इति मत्वाऽब्रुवन् जनाः ।।३१।।
देवदेव जगन्नाथ सर्वज्ञ परमेश्वर।
देहि देहि तदस्माकं ज्ञानं दुःखविनाशनम् ।।३२।।
अस्माकं भवकीटानां कोऽन्यस्त्राता विना त्वया।
त्रायस्व नः पुनः पाहि महात्मन् पुरुषेश्वर ।।३३।।
अस्माकं सकुटुम्बानां क्षेमं देह्यविचञ्चलम्।
यशःप्रज्ञां धनं देहि स्थानं देहि सुखात्मकम् ।।३४।।
अस्माकं कर्मजन्तूनामायुरारोग्यदो भव।
सर्वदा सुप्रसन्नस्त्वं भव देव रमापते ।।३५।।

इति मूढधियो लोका आत्माभिलाषलोलुपाः।
देहि देहीति शब्देन महात्मानं तमन्वगुः ।।३६।।
तान् दृष्ट्वान्येऽपि भूयांसो ब्राह्मणाः काममोहिताः।
तथाऽन्येऽपि च धावन्तः पृष्ठतस्तं न तत्यजुः ।।३७।।
तान्मूढान् समितान् दृष्ट्वा परितः प्रसृतान् विभुः।
संगत्यागमपेक्ष्याथ तेषां धैर्यं परीक्षितुम् ।।३८।।
प्रजगाम ततस्तूर्णं महारण्यं भयंकरम्।
तत्र चैवासने योगी मौनीभूत उपाविशत् ।।३९।।
(अर्घ्याणिः)**मायामुक्ताय शुद्धाय मायागुणहराय ते।**
शुद्धबुद्धात्मरूपाय कर्मणाऽर्घ्यं ददाम्यहम् ।।१।। ।।४०।।
सर्वावयवमुक्ताय सर्वमायाहराय ते।
सर्वसंतापनाशाय कर्मणाऽर्घ्यं ददाम्यहम् ।।२।। ।।४१।।
शुद्धात्मज्ञानदीपाय भक्तारिष्टहराय ते।
मायापाशविमुक्ताय कर्मणाऽर्घ्यं ददाम्यहम् ।।३।। ।।४२।।
एवमर्घ्यत्रयं दत्वा कुर्याद्दध्योदनार्पणम् ।।४३।।

इति श्रीमायामुक्तावधूतचरितं नाम दशमोऽवतारः



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ एकादशावतारचरितम्।

श्रीगणेशाय नमः।। श्रीसरस्वत्यै नमः।। श्रीगुरुभ्यो नमः।।

तेनैव ध्यानयोगेन स्थितं चापि न ते जहुः।
व्यालव्याघ्राग्निरूपाणि माययाऽदर्शयद्विभुः ।।१।।
तथापि ते महात्मानं नो जहुः काममोहिताः।
पूर्वरूपं तदाऽऽच्छाद्य मायायुक्तोऽभवत्तदा ।।२।।
ज्येष्ठशुक्ल त्रयोदश्यां भृगौ स्वात्यामिनोदये।
प्रादुर्बभूव स विभुर्मायायुक्तावधूतकः ।।३।।
शुद्धः श्यामो युवा ध्यानयोगस्थोऽङ्के स्वमायया।
नारीमादाय कल्याणीमुपविष्टो ह्यभासत ।।४।।
तं मायासहितं ते न तत्यजुः काममोहिताः।
विसृज्यध्यानयोगं तं गीतं सह तया जगौ ।।५।।
तं गायनपरं चापि ते जना नैव तत्यजुः।
ततः सह तया देव्या मद्यमांसरतोऽभवत् ।।६।।
ततस्तं मायया गुप्तं मद्यमांसादि सेवितम्।
शङ्कामुक्तरतिं दृष्ट्वा भ्रष्टोऽयमिति तत्यजुः ।।७।।
ततस्तान्निर्गतान्वीक्ष्य स्वगतं प्राह सो विभुः।
नारीयं दुष्टसंसर्गप्रतिबंधविमोचिनी ।।८।।
योगानुकूलभूता मे सर्वदा सुखकारिणी।
विचित्ररूपमय्याशु सर्वसंगनिवर्तकाम् ।।९।।
इदं च मे पानमिदं च मांसप्रसेवनम् मे जनसंगमुक्तये ।
इत्थं सदा योगहितं विचार्य तेनैव रूपेण चिरं चचार ।।१०।।
श्रुत्वैवमर्जुनः प्राह देवेन्द्रेणार्चितः कथम्।
एवं प्रभावो देवोऽपि श्रद्दधानाय शंस मे ।।११।।

गर्गमुनिरुवाच

नतावनात्तसुभगव्रतोऽयं परमेश्वरः।
तल्लीलां शृणु भूपेन्द्र यतोऽभीष्टार्थभागभूत् ।।१२।।
स दैत्यो दैत्यराट् जम्भो देवेन्द्रोऽपि सदैवतः।
स्वर्गायायुध्यतान्योन्यं दिव्यवर्ष पुरा भृशम् ।।१३।।
दैत्यैर्देवाः पराभूता गत्वोचुर्जीवमातुराः।
दृष्टः पराजयो नोऽद्य तत्किं कार्यमतः परम् ।।१४।।
तानाश्वास्याह धिषणो दत्तात्रेयं तपोधनम्।
शरणं यात वरदः स कार्यं वै करिष्यति ।।१५।।
इत्युक्तः सामरः शक्रः प्राप दत्ताश्रमं शुभम्।
तत्र देवं महात्मानमप्रतर्क्यं ददर्श सः ।।१६।।
दिगंबरमपि स्वाङ्के धृत्वा बालां दिगम्बराम्।
अनघां सुदतीं तन्वीं पानासक्तामपि स्थिताम् ।।१७।।
दृष्वैवमपि ते चक्रुः सेवां सर्वेऽमराः सदा।
तिष्ठन्तमुतस्थुस्ते प्रणता यान्तमन्वगुः ।।१८।।
भक्त्यैवं बहुकालं ते सेवयामासुरादरात्।
अथैकदाह भगवान् देवाः किं सेवयेच्छथ ।।१९।।
देवा ऊचुः प्रणम्येशं परमात्मन्जगत्प्रभो।
सयज्ञभागं त्रैलोक्यं दानवैरखिलं हृतम् ।।२०।।
वयं हृताधिकाराश्च तिष्ठामो मर्त्यवद्भुवि।
परित्राणाय नो देव तद्वधे च धियं कुरु ।।२१।।
त्वद्भक्तानां सुराणां नो विना त्वच्चरणाम्बुजात्।
गतिर्न विद्यते भूमन् पाह्यार्तान् शरणागतान् ।।२२।।
प्रहस्य प्राह तान्च्छ्रीमानहमुच्छिष्टदूषितः।
मद्यासक्तो वशी नैव मत्तः किं भवतां भवेत् ।।२३।।
स्त्रीसंभोगो हि दुःखाय तापाय च पुनस्तु सः।
दैवादुच्छिष्टतामस्याः प्राप्तोऽहं किमतो भवेत् ।।२४।।

देवा ऊचुःस्त्वमनघो ज्ञानदीपोऽनघाप्यसौ।
विद्या तव विभो यस्याः प्रसादात्सद्गतिः खलु ।।२५।।
यथाऽर्कस्य प्रभा भूमन् विप्रचंडालसंगिनी।
पुण्यं पापं च नादत्ते तथेयं प्रकृतिस्तव ।।२६।।
श्रीदत्तः प्राह यद्येवं भवतां संमतं ततः।
युद्धायाहूयतां दैत्यानिहानयत मा चिरम् ।।२७।।
ततो हृष्टाः सुरा जग्मुर्दैत्यांस्तेऽपि महाबलाः।
मुञ्चन्तो विविधास्त्रौघान्युयुधुर्मदविह्वलाः ।।२८।।
पलायनपरा आसन् देवास्तेऽसुरपीडिताः।
पृष्ठतोऽनुव्रजन्तस्ते दैत्या दत्ताश्रमं गताः ।।२९।।
कालयन्तः सुरान् दैत्या हन्यमानान्भयातुरान्।
श्रीदत्तपादसंलग्नान् समस्ताञ्छरणार्थिनः ।।३०।।
ददृशुस्ते महात्मानं दत्तात्रेयं दिगम्बरम्।
तन्वीं तां वामपार्श्वस्थां चार्वाङ्गीं प्रमदोत्तमाम् ।।३१।
पद्मपत्रायताक्षीं तां सुदतीं सुस्तनीं शुभाम्।
सर्वयोषिद्गुणाढ्यां तां दृष्ट्वाऽऽसन् काममूर्च्छिताः ।।३२।।
साभिलाषस्ततो दैत्यास्त्यक्त्वा देवान् वधूं वराम्।
हर्तुं मनो दधुः सर्वे तत्सौन्दर्यविमोहिताः ।।३३।।
वयं स्त्रीरत्नलाभेन कृतार्था इति तेऽसुराः।
उक्त्वा बलात् स्त्रियं क्षिप्त्वा शिबिकायां च के दधुः ।।३४।।
स्वस्थानाभिमुखा जग्मुः सानुरागाः स्मरातुराः।
योगीन्द्रोऽथ प्रहस्याथ दानवान्पश्यतामराः ।।३५।।
पराङ्गनाभिमर्शोत्थ पापेनातिबलीयसा।
हतश्रीका हतबला जाता एते न संशयः ।।३६।।
तन्मूर्धगाऽधुनेयं श्रीः शीर्षाण्युत्कृत्य सत्वरम्।
आयास्यत्यत्र नैवात्र शंका ह्येते मृतोपमाः ।।३७।।

हन्यन्तां तत्र भेतव्यं प्राप्तोऽद्य विजयक्षणः।
भवन्तोऽत्र निमित्तं ते हतप्रायाः श्रियार्दिताः ।।३८।।
इत्युक्तास्ते सुरा गत्वा शस्त्रैर्दैत्यशिरांसि तु।
फलानीवाशु वृक्षेभ्यः पातयामासुरुद्यताः ।।३९।।
हतेषु तेष्वजं प्राप्ता श्रीरुत्पत्त्याऽविभागिनी।
देवा अपि ययुः स्वर्गं पूर्ववच्छ्रीधराज्ञया ।।४०।।
एवं प्रभावः श्रीदत्त ईशस्तं शरणं व्रज।
इत्युक्तः सोऽर्जुनस्तेन श्रीदत्ताश्रममाययौ ।।४१।।

इति एकादशावतारे श्रीमायायुक्तावधूतचरिते जम्भासुरपराजयो नाम प्रथमोऽध्यायः।।

श्रीगणेशाय नमः।। श्रीगुरुभ्यो नमः।।

तदेव रूपमाराध्य कार्तवीर्यार्जुनो नृपः।
तत्प्रसादाच्चोभयर्धिं प्राप्तवान् तत्प्रसादतः ।।१।।

अर्जुन उवाच

मही महेश योगस्य मयास्थेया कथं वद।
इति पृष्टोऽर्जुनेनाह साङ्गं योगं त्र्यधीश्वरः ।।२।।

मायायुक्तावधूत उवाच

प्रयुञ्जती यदाऽऽत्मानं बद्धिस्तत्प्रेरकस्य हि।
मही देवस्य सवितुर्मम कार्या परिष्टुतिः ।।३।।
यो मद्‌गतान्तरात्माऽत्र श्रद्धावान्भजते हि माम्।
स ममातिप्रियो नूनं सर्वेषामेव योगिनाम् ।।४।।
त्वमपि श्रद्धया राजन् योगं युञ्जन् भजस्व माम्।
मत्प्रसादादिहैवाशु मत्सायुज्यं गमिष्यसि ।।५।।
इत्युक्तः प्रणतो राजा नत्वा प्राह सगद्‌गदः।
फुल्लास्याब्जो गलन्नेत्रो हृष्टरोमा तदाऽचिरात् ।।६।।

मोहतमो मम नष्टं त्वद्वचनान्न हि कष्टम्।
शिष्टमिदं मयि हृष्टं हृत्परमात्मनि तुष्टम् ।।७।।
क्लेशरुजां हरणेन त्वच्चरणस्मरणेन।
अस्मि कृतार्थ इहेश श्रीश परेश महेश ।।८।।
प्रेमदुघं तव पादं को न भजेदविवादम्।
दैववशाद्धृदि मेयं दर्शितवानसि मेयम् ।।९।।
आश्रिततापहरं तं पातकदैन्यहरं तम्।
नौमि शिवं भगवन्तं पादमहं तव सन्तम् ।।१०।।
गुरो गुरुतरागम्य गुरुगम्य गुणाकर।
गुरूत्तम नमस्तेऽस्तु संनिधो भव सर्वदा ।।११।।
एवं सुतीर्थः श्रीदत्तस्तीर्थकीर्तिः प्रसादितः।
फुल्लहृन्नेत्रवक्त्रश्च प्रेम्णा प्राह परेश्वरः ।।१२।।
विदितं मत्प्रसादेन परं तत्त्वं त्वयानघ।
यावद्दृढीभवेत्तावदभ्यासं कुरु यत्नतः ।।१३।।
अनुभूय चिरं तेन कृतकृत्यो भविष्यसि।
इत्युक्त्वा दक्षिणं हस्तं निदधौ तच्छिरस्यजः ।।१४।।
मा भी राजन् कृतार्थस्त्वं सायुज्यं मम यास्यसि।
इत्युक्तस्तं प्रणम्याशु गुहां गत्वा यथाविधि ।।१५।।
उपविश्यासने दध्यौ प्रसन्नकरणोऽर्जुनः।
समाहितोऽल्पकालेन सोऽभवत् सुदृढासनः ।।१६।।
उत्थितो द्वादशदिनैः पुनर्मासेन सुस्थिरः।
पुनः स्थाणुर्निश्चलात्मा त्रिमासा स समुत्थितः ।।१७।।
उत्थाय शनकैः प्राप्य ववन्देङ्घ्र्यब्ज ईशितुः।
तमालिङ्ग्याह भगवाननुभूतं किमुच्यताम् ।।१८।।
प्रहस्यार्जुनो नत्वा भूमन् क्वानुभवः पृथक्।
पृथक् च कोऽनुभविता सर्वत्रास्मीह खे खवत् ।।१९।।

बहुना किमिहोक्तेन निस्तीर्णोऽस्मि भवाम्बुधेः।
परमानन्द संदोहनिमग्नोऽस्मि निराकुलः ।।२०।।
न किञ्चिन्मेऽस्ति कर्तव्यं कृतं सर्वमशेषतः।
ज्ञातव्यमपि विज्ञातं प्राप्तं प्राप्तव्यमप्यहो ।।२१।।
इदं स्वात्मसुखं त्यक्त्वा मनो मे नैति कुत्रचित्।
न कं कृतेन राज्येन नाकं त्यक्तेन वा पुनः ।।२२।।
यद्याज्ञा भवतो भूयो ध्यानार्थं प्रविशे गुहाम्।
ईक्षे भवत्स्वरूपं वा सगुणं नाग्रहो मम ।।२३।।
श्रीशः प्राह नृप स्नात्वा कृत्वा नित्यविधिं सुधीः।
कृत्वाऽऽहारं समाधिं च श्वोभूते व्रज पूर्णदृक् ।।२४।।
इत्याज्ञप्तस्तथा चक्रे सोऽर्जुनोऽथ समाहितः।
षण्मासात्पुनरोत्थानं प्राप श्रीदत्तवांच्छया ।।२५।।
ततः पुनर्विशेत्युक्तो भूयो योगी समाहितः।
वर्षेणोत्थाय चागत्य नत्वाग्रे श्रीगुरोः स्थितः ।।२६।।
तं प्राह प्रणतं शान्तं स्वभक्तं भक्तवत्सलः।
स्वाग्रे तमुपवेश्याङ्ग त्वया पृष्टं मयोदितम् ।।२७।।
किमाचारेण मे कृत्यं तवापि च तथाप्ययम्।
धर्मः सनातनः सेव्यो लोकोपकृतये सदा ।।२८।।
लोकबाधानिरासार्थं विपरीतं क्वचिद्बहिः।
चरित्वाऽपि न हि त्याज्याः क्रिया वर्णाश्रमोचिताः ।।२९।।
गृहस्थेन त्वया भूप त्रिविधा कर्मचोदना।
लोकसंग्रहसिद्ध्यर्थं श्रद्धयैव विजानता ।।३०।।
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोऽपि च।
स यत्प्रमाणं मनुते लोकस्तदनुवर्तते ।।३१।।
दोषबुद्ध्योभयातीतो निषिद्धान्न निवर्तते।
गुणबुद्ध्या न विहितं करोति ज्ञोऽपि बालवत् ।।३२।।

यस्त्वात्मरतिरात्मज्ञः स्वात्मतृप्तः सदात्मवान्।
स्वात्मन्येवात्मना तुष्टस्तत्कार्यं क्वावशिष्यते ।।३३।।
कृतेन तस्य नैवार्थो नानर्थोऽप्यकृतेन च।
अतोऽस्य नैव कुत्रापि कश्चनार्थव्यपाश्रयः ।।३४।।
द्वावैतौ पुरुषौ लोके परमानन्दनिर्भरौ।
योगयुक्तो द्वयातीतो यश्च बुद्धेः परं गतः ।।३५।।
पुरीं गच्छावनिं पाहि सप्तद्वीपां भुजार्जिताम्।
देवान्यज्ञैर्यज श्राद्धैः पितॄन्, दानैर्द्विजानपि ।।३६।।
विप्रान्संतर्पय स्वर्णगोभूकन्यारथादिभिः।
भूयो भूयोऽपि मे प्रीत्या दर्शनं च समाचर ।।३७।।
स्मरणं कुरु राज्येऽपि हृदाऽव्यग्रेण मे सदा।
परानन्दस्वरूपं मे न विस्मरसि कर्हिचित् ।।३८।।
अन्तर्निष्ठः सदा युक्तो बहिर्व्यवहरन्नपि।
प्रवाहपतितं कर्म कुरु तेन न लिप्यसे ।।३९।।
जीवन्मुक्तः सदा तिष्ठ यावदारब्धमात्मदृक्।
ततो विदेहकैवल्यं प्राप्स्यसे मयि निश्चितम् ।।४०।।
मयाऽनुशिष्टो गच्छाशु यथोक्तं सम्यगाचर।
सुखी भवानन्दमयः सदैव त्वं निरामय ।।४१।।

इति एकादशावतारे श्रीमायायुक्तावधूतचरिते कार्तवीर्यार्जुनचरितवर्णनं नाम द्वितीयोऽध्यायः।।

।। श्रीगणेशाय नमः।। श्रीगुरुभ्यो नमः।।

प्रविश्याश्रममासीनं दत्तात्रेयं दिगम्बरम्।
ददर्शानघयाऽऽश्लिष्टं देव्या रामो महामतिः ।।१।।
अभिवाद्येश्वरं मत्वा प्रार्थयामास भक्तितः।
कृपां कुरु मयि ब्रह्मन् भक्तवत्सल सर्ववित्।।

संस्कर्तुं पितरावत्र प्राप्तोऽस्मि ब्रूहि मे विधिम् ।।२।।

श्रीदत्त उवाच

अनाचारो न जानामि धर्मं वाऽधर्ममप्युत।
यथेष्टां गतिमाश्रित्य स्थितोऽस्मीह पिशाचवत् ।।३।।

राम उवाच

योगीश्वरः सर्वगुरुः कर्ता हर्ता जगत्प्रभुः।
सदानन्दो गुणातीतो धर्माधर्मौ कुतस्तव ।।४।।
रामोऽवदत् करिष्येऽहं महीं निःक्षत्रियामिति।
संकल्पितमृतं भूयात् प्रसादाद्भवतोऽधुना ।।५।।
दत्तः प्राह तमालिङ्ग्य त्वं सखा मेऽसि निश्चितम्।
कृतं साधु त्वया राम सत्यसंधो भविष्यसि ।।६।।
ततः श्रीशाज्ञयाऽऽनीय सर्वतीर्थानि सायकैः।
भित्वाद्रिं विधिवत् सस्नौ रामः पश्चाच्च रेणुका ।।७।।
गुरुणापि समाधाय क्रव्यादाग्निं यथाविधि।
सुमंगला विवेशासौ सह पत्याऽऽहिताग्निना ।।८।।

राम उवाच

यज्ञाय ज्ञाय ते दत्त नमस्त्वं मे सखास्यतः।
भूत्वाऽऽचार्यः कारयौर्ध्वदेहिकं विधिवत्तयोः ।।९।।
इत्यर्थितः स रामेण भूत्वाऽऽचार्योऽप्यकारयत्।
विधिनाऽञ्जलिदानादि पिण्डनिर्वापणादि च ।।१०।।
श्रीदत्तः प्राह पितरौ क्व गतौ राम वेत्सि किम्।
स प्राह त्वत्प्रसादात्तौ स्वर्गताविति भाति मे ।।११।।
श्रीशः प्राह मृतौ स्वर्गं गतावित्यज्ञभावना।
न मृतौ न गतावेतौ पश्य लीलाविहारिणौ ।।१२।।
रामोऽपि पितरौ दृष्ट्वा द्योतयन्तो दिशस्त्विषा।
ननाम परया भक्त्या तौ ततोऽदर्शनं गतौ ।।१३।।

प्राहाश्लिष्य प्रभू रामं क्षत्रियाञ्जह्यधार्मिकान्।
मच्चिदंशयुतस्त्वं तु सखे जिष्णुर्भविष्यसि ।।१४।।
ततो रामः प्रणीतायां स्नात्वा संकल्प्य सायुधः।
त्रिःसप्तवारं निःक्षत्रां क्ष्मां कृत्वाऽस्त्रसरांस्यधात् ।।१५।।
पितॄन् संतर्प्य शस्त्राणि प्रक्षाल्याचार्यमत्रिजम्।
ऋत्विजः कश्यपमुखान् वृत्वा सोमेन सोऽयजत् ।।१६।।
सर्वे देवा यत्र तृप्ता विप्राश्चान्नधनांशुकैः।
सर्वां क्ष्मां कश्यपायादाद्विशुद्धात्मा विधानतः ।।१७।।
स्वर्णवस्त्रधनै रामो दत्ताचार्यमपूजयत्।
तत्सर्वं ब्राह्मणेभ्योऽदाद्भगवान् भक्तिभावनः ।।१८।।
प्राह रामं निवेश्याङ्के बालेदं दुष्करं कृतम्।
कर्मामी क्षत्रिया दुष्टा दुर्जया अपि ते हताः ।।१९।।
कृतो यज्ञोऽपि विधिवच्छूरोऽसि त्वं हरिः स्वयम्।
रामः प्राह न शूरोऽहं प्रसादो भवतामयम् ।।२०।।
साधु साध्विति ते प्राहुर्देवाश्च मुनयोऽपि च।
रामेण सत्कृता जग्मुः स्वस्वधामाखिला मुदा ।।२१।।
सख्यं कृत्वाऽवसद्रामस्तस्मै तुष्टोऽवदत्प्रभुः।
रहस्यं त्रिपुरादेव्याः श्रवणान्मुक्तिदं क्षणात् ।।२२।।
सखा वै त्वं चिरं जीव कञ्चित्कालं वसात्र तु।
तपश्चर ततो लोकशर्मणे पश्चिमाम्बुधौ ।।२३।।
त्वयि तेजोऽद्य यन्न्यस्तमवतारान्तरे पुनः।
आदास्ये त्वं ततो ब्राह्म्या लक्ष्म्या युक्तस्तपश्चर ।।२४।।
भविष्यसि महर्षिस्त्वं नूनं सावर्णिकेऽन्तरे।
ततः प्राप्ते महाकाले मत्सायुज्यं गमिष्यसि ।।२५।।
एवं रामं जामदग्न्यमुक्तवान् भगवान् प्रभुः।
रामोऽपि स्वाश्रमं गत्वा कञ्चित्कालमुवास ह ।।२६।।

इति एकादशावतारे श्रीपरशुरामानुग्रहो नाम तृतीयोऽध्यायः।।

(अर्घ्याणि)**स्वमायागुणगुप्ताय मुक्ताय परमात्मने।**

सर्वत्राज्ञाननाशाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।२७।।

मायास्थाननिवासाय मायामुक्ताय चात्मने।

भक्तारिष्टविनाशाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।२८।।

योगारिष्टविनाशाय देवदेवेश्वराय ते।

जम्भदर्पविनाशाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।२९।।

एवमर्घ्यत्रयं दत्वा कुर्यान्मधुसमर्पणम् ।।३०।।

इति श्रीवासुदेवानन्दसरस्वतीविरचितं मायायुक्तावधूतचरितवर्णनं नाम एकादशावतारः।।



अथ द्वादशावतारचरितम्।

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।

षट्त्रिंशेऽलर्कबोधाय काशिराजसहायतः।
चक्रेऽलर्कं भ्रष्टराज्यं सुबाहुः सोऽभ्यगाद्गुरुम् ।।१।।
अलर्कस्त्वकरोद्राज्यं पितृवत्पालयन्प्रजाः।
शिक्षां दुष्टेषु शिष्टेषु रक्षां दीनेषु वै कृपाम् ।।२।।
चकार सोऽर्थधर्मेण धर्मं चार्थेन नीतिमान्।
तयोरेवाविरोधेन दिव्यार्थानभजत्सदा ।।३।।
सुबाहुस्तादृशं विद्वान् बुबोधयिषुरात्मनि।
काशिराजसहायार्थी स पुनर्योद्धुमाययौ ।।४।।
भ्रात्रा रुद्धं पुरं क्षीणान् कोशान् परवशांश्च तान्।
मंत्र्यादीन् वीक्ष्य सोऽलर्को भीतो दुद्राव पीडितः ।।५।।
एकाकी सोऽश्वमारुह्य रात्रौ गत्वा वनं स्थितः।
ऋष्याश्रमे स्मरन् मातुरुपदेशं तदा नृपः ।।६।।
प्रातः स्नात्वा स निष्कास्य मुद्रां कृतसुमङ्गलः।
वाचयामास विप्रेण मात्रा विलिखितं हितम् ।।७।।
त्याज्यः सर्वात्मना संगः स चेत्त्यक्तुं न शक्यते।
स सद्भिः सह कर्तव्यः संतो दुःसंगभेषजम् ।।८।।
कामः सर्वात्मना हेयो हातुं चेच्छक्यते न सः।
मुमुक्षां प्रति कर्तव्यः सैव कामार्तिभेषजम् ।।९।।
इति श्रुत्वा मार्तृहार्दं बुद्ध्वा सह्याद्रिसंस्थितम्।
ज्ञात्वा सत्तममात्रेयं निर्विण्णः शरणं ययौ ।।१०।।
आषाढे पौर्णिमायां च दिवाऽऽदिगुरुराबभौ।
आद्ये यामे द्वितीये सन्मुहूर्ते मन्दवासरे ।।११।।
प्रणम्याह स भो ब्रह्मन् प्रसादं कुरु मे प्रभो।
दैवाद्दुःखं समुत्पन्नं कृपया तदपाकुरु ।।१२।।

भगवांस्तद्वचः श्रुत्वा ज्ञात्वाऽलर्कं महामतिः।
मदालसागर्भरत्नं प्रहस्येदमभाषत ।।१३।।
दुःखं नृप किमर्थं ते कस्त्वं दुःखं च कस्य च।
विचार्याङ्गानि चात्मानं क्व दुःखं सत्यमिद्वद
।।१४।।
इत्युक्तः स चिरं ध्यात्वा विमृश्य च पुनः पुनः।
विहस्याहात्मनाऽऽत्मानं ज्ञात्वा सर्वाककारणम् ।।१५।।
खं वायुरग्निरम्बु क्ष्मा नाहं तज्जानि चेह तु।
सङ्घेऽहमिति मन्तुस्तद्भाति दुःखाद्यसद्विभो ।।१६।।
नित्यो मे महिमानास्य क्षयो वृद्धिश्च यद्यपि।
भौतिके तौ सुखाद्यं वा किं पारक्येन तेन मे ।।१७।।
नित्यः सदैकरूपोऽहं परिणामः कुतो मम।
संगे देहस्य संत्यक्ते दुःखादि क्वोपलक्ष्यते ।।१८।।
स्थूलेऽत्र भौतिके सूक्ष्मे तन्मात्रावस्थितेऽपि च।
उत्थितं त्रिविधं दुःखं पश्यतो मम तेन किम् ।।१९।।
मनो मतिरहंकारश्चित्तं च न भवाम्यतः।
अन्तःकरणजैर्दुःखैः संबन्धो न परस्य मे ।।२०।।
राज्यं करोत्वग्रजोऽत्र किं मे संघाभिमानतः।
स चाहं देहतोऽन्योऽपि पार्थक्यं न सतो हि मे ।।२१।।
यस्य भूतस्य हस्तादिसंबन्धो नात्मनः पुनः।
क्वेभाश्वकोशराष्ट्राद्यैरसंगस्य चिदात्मनः ।।२२।।
तस्मान्नारिर्न मे मित्रं सुखं दुःखं पुरं बलम्।
पुरोत्पन्नोऽपि मोहोऽयं नष्टो भवदनुग्रहात् ।।२३।।
यथैकमपि खं भाति बहुधोपाधिभेदतः।
तथाऽहं काशिपो भ्राता न भेदः पारमार्थिकः ।।२४।।
असम्यग्दर्शनाद्दुःखं मतं मे स्वप्नसंनिभम्।
निर्ममो निरहंकारस्तन्नेक्ष्येऽद्य सुखाब्धिगः ।।२५।।

यथा तु भक्षिते दुःखं शुकादौ ममतावृते।
न तथा ममताहीने वृकादौ तद्वदत्र तु ।।२६।।
न दुःखी न सुखी सोऽहं निर्ममः प्रकृतेः परः।
यो भूताभिभवो भूतैः सुखदुःखात्मकः स च ।।२७।।
श्रीदत्तः प्राह भूपेन्द्र सम्यग्व्यवसितं त्वया।
दुःखमूलं ममेत्यस्य निवृत्तिर्न ममेति च ।।२८।।
ब्रह्मनिष्ठोत्तमे प्रश्नात् स्वानुभूत्या निराकृता।
ममता शाल्मलीतूल इव वातेन तेऽधुना ।।२९।।
(अर्घ्याणि)**सर्वत्राज्ञानाशाय गुरवे परमात्मने।**
दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।३०।।
चिदात्मज्ञानदीपाय गुरवे ब्रह्मरूपिणे।
दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।३१।।
भेदतापविनाशाय सच्चिदानंदरूपिणे।
दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।३२।।
एवमर्घ्यत्रयं दत्वा सुवर्णं च समर्पयेत् ।।३३।।

इति श्रीमद्वासुदेवानंदसरस्वतीविरचितं आदिगुरुचरितवर्णनं नाम द्वादशावतारः।।



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ त्रयोदशावतारचरितम्।

।। श्रीगणेशाय नमः।। श्रीगुरुभ्यो नमः।।

कदाचित्पिङ्गलो नागो दृष्ट्वाऽमुं माहुरस्थितम्।
कृष्णधात्रीतले वेदं पठन्तं व्रात्यवेषतः ।।१।।
पप्रच्छ भवतः कोऽयमाश्रमो वर्णगर्हितः।
वर्णित्वं ते न कौपीनमौञ्जीदण्डादिवर्जित ।।२।।
न गृहित्वं चाग्निहोत्रद्विसूत्रादिविवर्जित।
वनित्वं ते न चागन्तुसाधनादिविवर्जित ।।३।।
न भिक्षुत्वं शिखाग्राम्यभोगयुक्त दिगम्बर।
केनोपदिष्टो मार्गोऽयं नग्नस्त्रीमद्यलालस ।।४।।
प्रभुः प्राह तमुक्तान्यः पञ्चमोऽयं ममाश्रमः।
योऽविकल्पेनात्मरूपं विश्वं पश्येदभेददृक् ।।५।।
वैराग्ययुक्तो वीतारिस्तस्यायं पञ्चमाश्रमः।
त्वया श्रुतो न वै तं हि जानीयुर्ब्राह्मणा समाः ।।६।।
इत्थं श्रुत्वा सोऽनसूयागर्भरत्नमिदं महः।
इति मत्वाऽतिखिन्नस्तं प्रार्थयामास दीनवाक् ।।७।।
शुक्लाष्टम्यां श्रावणस्य विशेषादिन्दुवासरे।
शिवरूपधरं दृष्ट्वा दत्तात्रेयं महामुनिः ।।८।।
कुत्सिता रुशती धाष्ट्र्याद्वागुक्ता मेऽनयाऽनघ।
भर्त्सितोऽसीश मां शाधि दौरात्म्यं मे क्षमस्व भोः ।।९।।
इति क्षमाप्य विश्वेशं संप्राप्तानुग्रहो मुनिम्।
अभिवाद्य प्रसन्नात्मा स्वाश्रमं पिङ्गलो ययौ ।।१०।।

(अर्घ्याणि)संसारदुःखनाशाय शिवाय परमात्मने।
दत्तात्रेयाय देवाय कमणार्घ्यं ददाम्यहम् ।।१।। ।।११।।
भेदतापविनाशाय मुख्यबिम्बाय चात्मने।
दत्तात्रेयाय देवाय कमणार्घ्यं ददाम्यहम् ।।२।। ।।१२।।

सर्वत्राभेदरूपाय सर्वत्र विमलाय ते।
सर्वदानंदरूपाय कमणार्घ्यं ददाम्यहम् ।।३।। ।।१३।।
एवमर्घ्यत्रयं दत्वा प्रदद्यादुदकं शुभम् ।।

इति श्रीमद्वासुदेवानंदसरस्वतीविरचितं श्रीशिवरूपचरितवर्णनं नाम त्रयोदशोऽवतारः।।



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ चतुर्दशावतारचरितम्।

।। श्रीगणेशाय नमः।। श्रीदेवदेवाय नमः।।

मार्कण्डेय उवाच।

अथ व्रजन् दक्षिणाशां दत्तात्रेयो महामुनिः।
लोकान् पूतानथाकार्षीद्गमनस्नानभोजनैः ।।१।।
ततः कालेन बहुना सह्याद्रिमगमन्मुनिः।
रम्यपर्वतराजेन्द्रं दृष्ट्वा स्थातुं मनो दधे ।।२।।
दत्तात्रेयो महायोगी योगाभ्यासरतः सदा।
समः सर्वेषु वेदेषु ऋषिरूपधरो हरिः ।।३।।
दत्तात्रेयाश्रमो रम्यः सदा पुष्पफलैर्द्रुमैः।
सेवितो मुनिभिः सिद्धैर्देवैः सेन्द्रैः सकिन्नरैः ।।४।।
सिंहाश्च नागाश्चैकत्र तत्रैव गतवैरकाः।
तत्र व्याघ्रा हरिण्यश्च नकुलाः पन्नगास्तथा ।।५।।
तत्र ध्यानपराः सिद्धाः मुनयश्च तपोधनाः।
लोके च नियतात्मानस्ते सर्वे तत्र संस्थिताः ।।६।।
देवदेवस्वरूपेण दत्तात्रेयः स्वयं हरिः।
कृष्णामलकवृक्षस्य मूले तिष्ठति नित्यशः ।।७।।
तत्र दृष्ट्वाऽच्युतं देवं शङ्खचक्रगदाधरम्।
अथ प्रजापतिर्देवः सत्यलोकस्थितैर्जनैः।।
संवृतो ह्यगमत् सद्यो दत्तात्रेयाश्रमं प्रति ।।८।।
भाद्रे दिवा शुक्लचतुर्दशीतिथौ। भृगोर्दिने भे शततारकाख्ये।।
आद्येव यामे शुभदे मुहूर्ते। दृश्योऽभवत्तत्र स देवदेवः ।।९।।
पुण्ये कृष्णामलीग्रामे दत्तात्रेयस्य चाश्रमे।
ददर्श च शतानन्दो देवदेवेश्वरं विभुम् ।।१०।।

अव्यक्तं व्यक्तयुक्तं तु सगुणं गुणवर्जितम्।
नामरूपादिरहितं नामरूपधरं हरिम् ।।११।।
किरीटेनार्कवर्णेन भासमानं रमापतिम्।
देवदेवेश्वरं देवं योगिनां हृदयंगमम् ।।१२।।
दृष्ट्वा चतुर्मुखो देवं साष्टाङ्गं प्रणिपत्य च।
कृताञ्जलिपुटो भूत्वा स्तुतिं चक्रे समाहितः ।।१३।।

ब्रह्मोवाच

जयजय सकलानंदकारक। जय भूधरादि भुवनधारक।
जय वृंदारकवृंदानन्ददायक।
जयावनिजलदहनपवननभसां जनिस्थितिमृतिकारक।।
जय विबुधानंदसंदोहप्रद।
जय परमहंसपरिव्राजकादिनिष्किञ्चनजनप्रिय
जय त्र्यंबकादिसुरेशपूजित।।
जय जितात्मनां जनिस्थितिनिवृत्तिकारक भगवन्
भजनवल्लभ, जय सह्याद्रिमण्डन।
एवं स्तुतो देवदेवः स्तुत्यकीर्तिर्जनार्दनः।
चतुर्मुखेन लोकानां पतिना जगदीश्वरः ।।१४।।
स्तोत्रावसाने देवेशो जगतां पतिरच्युतः।
विरिञ्चिमूचे भगवान् वरं ब्रूहीति भारत ।।१५।।

ब्रह्मोवाच

दुर्लभं मुनिरूपस्य दर्शनं तव दुर्लभम्।
तच्च लब्धं द्वयं देव किमन्यत् प्रार्थयामि ते ।।१६।।
दृष्टोऽसि जगतां नाथ कृतार्थो दर्शनेन ते।
कृतकृत्या वयं देव दत्तात्रेयस्य दर्शनात् ।।१७।।
आयातयातं नाद्यापि निवृत्तं मम केशव।
पुनर्भवो यथा नास्ति तथा कुरु जगत्पते ।।१८।।

देवदेव उवाच।

मद्दर्शनेन ते ब्रह्मन् निवृत्तं कर्मजं फलम्।
अधुना मत्स्वरूपे त्वं मुनिभिर्लयमाप्स्यसि ।।१९।।
इति प्रादाद्वरं देवस्त्रैलोक्यानन्ददायकः।
ब्रह्मणे मुनिशार्दूल ऋषिभिः सह सत्यवाक् ।।२०।।
ततो विवेश सगणो देवदेवस्य चक्रिणः।
निजस्वरूपे देवस्य शतानन्दो लयं गतः ।।२१।।
सह्याद्रौ दण्डकारण्ये दत्तात्रेयस्य चाश्रमे।
परमेष्ठी परां मुक्तिमवाप मुनिभिः सह ।।२२।।
(अर्घ्याणि) **देवदेवाय देवाय दुःखशोकहराय च।**
दुरितौघविनाशाय कर्मणार्घ्यं ददाम्यहम् ।।१।। ।।२३।।
सर्वापराधनाशाय सर्वपापहराय च।
देवदेवाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।२।। ।।२४।।
भक्तप्रियाय देवाय शुद्धाय परमात्मने।
दत्तात्रेयाय देवाय कर्मणार्घ्यं ददाम्यहम् ।।३।। ।।२५।।
एवमर्घ्यत्रयं दत्वा ताम्बूलं च समर्पयेत्।

इति श्रीमद्वासुदेवानंदसरस्वतीविरचितं श्रीदेवदेवावतारकथनं नाम चतुर्दशोऽवतारः।।



श्रीदत्तात्रेयषोडशावतारचरितानि

अथ पञ्चदशावतारचरितम्।

।। श्रीगणेशाय नमः।। श्रीदिगम्बराय नमः।।

आसीद्राजा यदुर्नाम सोमवंश्यो महामतिः।
धर्मात्मा नीतिमान् दक्षः श्रीदत्तार्चनतत्परः ।।१।।
राज्यं शशास बह्वब्दं कदाचित् पर्यटन् स गाम्।
ददर्श निर्भयं दक्षमवधूतं कविं सुधीः ।।२।।
तं नत्वोचे जनः प्रायः श्र्यायुःकीर्त्यृद्धिहेतुकः।
पुमर्थानीहते त्वं तु कल्पोऽपि न तथा कथम् ।।३।।
तप्यमाने जने कामवह्निनाऽपि न तप्यसे।
निष्कामोऽसि कुतोऽकर्ता रोचते चेद्वद प्रभो ।।४।।
इत्युक्तस्तं प्रभुः पुंसां श्रेयसे प्राब्रवीत्परम्।
तत्त्वं बुद्ध्याश्रितगुरुशिक्षितं ज्ञानमात्मनः ।।५।।
मदर्चकोऽस्यतो राजन् समाधाय मनः शृणु।
चतुर्विंशतिराचार्याः सन्ति मे बुद्ध्युपाश्रिताः ।।६।।
यच्छिक्षयेदृशो भूमा मुक्तसंगश्चरे महीम्।
वक्ष्ये येभ्यो मया यद्यच्छिक्षितं शीघ्रमुक्तिदम् ।।७।।
न दैवानुगभूतार्तः क्ष्मेव धीरः सृतेश्चलेत् ।
सदा परार्थोद्भवेहो नगाच्छिक्षेत्परात्मताम् ।।८।।
प्राणवृत्त्याक्षिप्तहृद्वाग्विद्भृत्तुष्येन्न गोप्रियैः ।
तद्भुग्दोषगुणास्पृग्विधर्मासक्तश्च देहगः ।।९।।
गुणाश्रयो गुणैर्युज्येन्न गन्धैर्वायुवत्स्वदृक् ।
कालोत्थगुणतेजोऽब्भूमयभावास्पृगित्पुमान् ।।१०।।
वायूत्थाब्दास्पृक्खवच्चान्तःस्थेनाभिदसङ्गती ।
भाव्ये सर्वान्वयव्याप्त्या ब्रह्मात्मत्वात्ततात्मनः ।।११।।

रस्यः स्निग्धः प्रकृत्याच्छो ज्ञोऽब्वद्धाम्ना पुनाति नॄन्।
छन्नः स्पष्टोऽपि काम्यर्च्यः प्रागुदग्दात्रघं दहन् ।।१२।।
क्वापि भुङ्क्ते तपस्तेजोदीप्तोऽक्षोभ्योऽपरिग्रहः।
मलास्पृक्सर्वभक्षोऽपि ज्ञोऽग्निवच्चेन्धसीयते ।।१३।।
तत्तद्रूपः स्वमायोत्थोच्चासतस्थेशोऽग्निहेतिवत्।
कालान्नित्येऽपि दृश्येते नात्मभूतोद्भवक्षती ।।१४।।
देहः कलावद्विकारी कालेनात्माब्जवद् ध्रुवः।
भात्यात्मा तत्स्थवद्व्यक्तौ न स्वस्थो बुध्यतेऽर्कवत् ।।१५।।
स्थूलबुद्ध्याऽर्कवद्गोभिर्गा यथास्वं गुणैर्गुणान्।
आदत्ते विसृजत्यत्र सदा योगी न युज्यते ।।१६।।
नाऽतिस्नेहप्रसङ्गाक्तो नश्येद्दीनः कपोतवत्।
कश्चित्कपोतः कपोती क्रीडादौ चेरतुर्वने ।।१७।।
प्रेम्णाऽशङ्कं मिथोबद्धध्यक्षङ्गौ पाति स श्रमात्।
तर्पयन्ती साऽसूतार्भांस्तांस्तौ पुपुषतुर्मुदा ।।१८।।
कदाचिल्लुब्धको नीडाद् बहिःस्थांस्ताञ्छिचाददे।
क्रोशन्तीं पतितां दुःखार्त्तां तं चापस्मृतिं तथा।।१९।।
द्वन्द्वारामः प्रियाऽशान्तो गृहासक्तो विवन्नरः।
क्रान्तापावृतमुक्तिद्वार्-नृजन्मच्युत एव सः ।।२०।।
क्वाप्यस्त्यैन्द्रियसौख्यं तन्नैच्छेदाजगरोऽक्रियः।
यदृच्छयाप्तं महान्तं ग्रासं वाल्पं रसारसम् ।।२१।।
भक्षेच्चेन्नाप्तोऽनशनो दैवभुक्सर्पवत्स्वपन्।
विनिद्रोऽक्रियबल्यङ्गधृग्गोमानपि नेहते ।।२२।।
पूर्णो हीनोऽप्यजपरो न सर्पति न शुष्यति।
ज्ञोऽब्धिवत्सिन्धुभिर्निम्नोऽनन्तपारो दुरत्ययः ।।२३।।
सदाऽक्षोभ्यो दुर्विगाह्यः प्रसन्नः स्तिमिताब्धिवत्।
नाऽवशोऽग्नौ विवन्नश्येत् स्त्रीलीलारूपमोहितः ।।२४।।

गृण्हीयात्सर्वतः सारं रमेन्नैकत्र चाल्पभुक्।
संग्रहे नाशबीजेऽपि मधुकृद्वन्मुनिः सदा ।।२५।।
बध्येत नाङ्गनास्पर्शाच्छूरैर्हन्येत वेभवत्।
अन्योऽकात्सञ्चितं लुब्धैर्न भुक्तं नार्पितं धनम् ।।२६।।
भुङ्क्तेऽकार्जितगृह्यन्नं प्राग्भिक्षुर्मधुहेव च।
ना बध्येतैणवद्गीतान्नृत्याद्वाप्यृष्यश्रृङ्गवत् ।।२७।।
प्रमाथिजिह्वया नैति बडिशैर्मत्स्यवल्लयम्।
जय्याल्पभुज्या साऽसक्त्या जितं सर्वं जिते रसे ।।२८।।
वेश्यैकार्थदकान्ताशाध्वस्तनिद्रा सुखावहम्।
चिन्ताहेतुं हि निर्वेदं गत्वाऽत्मस्थं रतार्थदम् ।।२९।।
रामं हित्वा कुवृत्त्यान्यं भीशुङ्मोहदमध्रुवम्।
काङ्क्षे धिङ्मात्मनात्मानं रमे क्रीत्वाऽमुनेति सा
।।३०।।
मत्वा तथाऽभूत्ध्याशाऽकं नैराश्यं परमं सुखम्।
परिग्रहोऽकाय तज्ज्ञोऽस्वोऽप्यनन्तसुखायते ।।३१।।
सामिषं कुररं हन्ति शूरोऽतो व्यामिषः सुखी।
मानावमानचिन्तोनः स्वक्रीडः स्वरतिः सुखी ।।३२।।
बालवद्धि जडोऽज्ञोऽर्भश्चात्मानन्दो गुणातिगः।
भङ्क्त्वैकैकं महारावान् रणन्तौ द्वौ कुमार्यपि ।।३३।।
पाण्योर्धृत्वैकैकशङ्खं रहःकृत्येऽलभत्सुखम्।
कलिर्भूम्नि द्वयोर्वार्ता ह्येकतस्तच्छङ्खवच्चरेत् ।।३४।।
एकचार्यप्रमत्तोऽल्पवाग्गुहास्थोऽगृहो मुनिः।
एकोऽहिवद्गत्यलक्ष्यो गृहारम्भोऽध्रुवात्मनः ।।३५।।
विफलोऽकाय सर्पोऽन्यकृतधाम्न्येधते सुखम्।
जितश्वासासनेनेशे वैराग्याभ्यासबद्धहृत् ।।३६।।
संयुक्तं वासनां मुक्त्वा सत्त्ववृद्ध्यैत्यनिन्धनम्।
निर्वाणं वेत्त्यतो नान्तर्-बहिःस्थं मुनिरात्मदृक् ।।३७।।

यथेष्वितात्मेषुकृन्नो वेदेनं यान्तमग्रतः।
प्रेम्णाप्यचलहृद्ध्यानाद् विष्णोः सारूप्यमेति ना ।।३८।।
प्राग्रूपमुत्सृजन्पेशस्कृद्ध्यानात्कीटवद्द्रुतम्।
यथोर्णनाभिस्ततोर्णां विहार्यान्तेऽत्ति तां तथा ।।३९।।
प्राक्स्वमायासृष्टमेकः संहृत्याभूत् क्षयेऽद्वयः।
शक्त्याखिलाश्रयः सर्वेट् कालेनात्मानुभावतः ।।४०।।
साम्येतसत्त्वादिशक्तिः प्रधानपुरुषेडजः।
व्युपाधिः परमानन्दो मोक्षाख्यः सपरावरः ।।४१।।
गुणत्मिकां स्वमायां स क्षोभयन्स्वानुभावतः।
तया सृजति सूत्रं सा त्रिगुणा शक्तिरासृजत् ।।४२।।
विश्वं यस्मिन्प्रोतमेतद् येन संसरते पुमान्।
देहात्स्तो बोधवैराग्ये पारक्यात्सोद्भवक्षयात् ।।४३।।
आत्मेष्टभृत्सृष्टबीजः प्रियेच्छुर्नश्यति द्रुवत् ।
गावः स्वार्थे सपत्नीवत्तं लुनन्ति हि दुर्लभम् ।।४४।।
मत्वा नृजन्मात्तवित्क्ष्मां चरे मुक्तोऽनहंकृतिः।
तच्छ्रुत्वा समचित्तोऽभून् मुक्तसङ्गो यदुर्द्रुतम् ।।४५।।
आश्विनस्य सिते पक्षे पूर्णिमायां ज्ञवासरे।
अश्विन्यामुदिते सूर्ये श्रीदत्तोऽभूद्दिगम्बरः ।।४६।।
नत्वात्रीशं तदादिष्टो यदुः स्वैरं चचार गाम्।
तद्रूपं पूजयन्विश्वं सत्तास्फूर्त्यन्वितं मितम् ।।४७।।
दत्तप्रसादात् तद्वंशविस्तरोऽभूदिहोन्नतः।
कृष्णोजः सकलो वृष्णिकुले भूभारहाऽभवत् ।।४८।।

इति श्रीमद्वासुदेवानंदसरस्वतीविरचिते दिगम्बरावतारे प्रथमोऽध्यायः।।

।। श्रीगणेशाय नमः।। श्रीगुरुभ्यो नमः।।

ततः प्रल्हाद नामासौ ववृधेऽरिभयङ्करः।
काले काव्येनोपनीतः शिक्षितोऽप्यभजद्धरिम् ।।१।।

आबाल्यं नारदादेशाद्धर्मे भागवते रतः।
भूत्वाप्यनात्मवित्त्वेन शांतिं न परमां ययौ ।।२।।
औदासीन्येन स वनं पर्यटन् मृगयामिषात्।
भाग्याद्ददर्श सह्याद्रौ कावेर्यां निद्रितं भुवि ।।३।।
कर्माद्यैर्वर्णलिङ्गाद्यैरप्रतर्क्यं रजस्वलम्।
नत्वा प्राहावधूतं तं निगूढामलतेजसम् ।।४।।
कथं भोगीव धत्तेऽस्वः पीनां तनुमुद्यमः।
उद्योगात् स्वं ततो भोगो भोगात्पीना तनुर्भवेत् ।।५।।
शयनोऽनुद्यमोऽनीहो भवानीह तथाऽप्यसौ।
पीना तनुः कथं सिद्धो भवान् वदतु चेत्क्षमम् ।।६।।
विद्वान् दक्षोऽपि चतुरश्चित्रप्रियकथो भवान्।
दृष्टाऽपीह जनांश्चित्रकर्मणा वर्तते समः ।।७।।
इत्थं श्रीभगवांस्तेन प्रल्हादेनात्रिनन्दनः।
संपृष्टः प्राह संतुष्टः कृपालुः प्रहसन्निव ।।८।।

दिगम्बर उवाच

श्रीनृसिंहोऽवतीर्णोऽत्र यदर्थं स त्वमेव हि।
दैत्यजोऽपि मुनिच्छात्र शृणु भागवतोत्तम ।।९।।
मंदः स्वज्ञो भ्रमंस्तृष्णानद्येमं लोकमागतः।
कर्मयोगेन मुक्तिस्वर्मोहद्वारं यदृच्छया ।।१०।।
निवृत्तोऽस्म्यत्र यततां व्यत्ययं वीक्ष्य शर्मणे।
आत्मनोऽस्य सुखं रूपं क्लिष्टनष्टे स्वयम्प्रभम् ।।११।।
ज्ञात्वा संस्पर्शजान्भोगान्दुःखात्स्वप्स्यामि दैवभुक्।
विस्मृत्यामुं जनः स्वार्थं सन्तं यात्युग्रसंगतिः ।।१२।।
स्वार्थं मायावृतं त्यक्त्वा तदर्थ्यन्यत्र धावति।
शैवालछन्नकं त्यक्त्वा यथाम्ब्वर्थी मरीचिकाम् ।।१३।।
अभाग्यस्य क्रिया मोघाः सुखप्राप्त्यै प्रयोजिताः।
तत्साफल्येऽप्यसद्भिः किं कार्यं मर्त्यस्य कृच्छ्रजैः ।।१४।।

कामार्थेच्छोर्मोहशोकरागद्वेषश्रमादयः।
यतो जितात्मनो नैति निद्राऽपि भयशंकया ।।१५।।
प्राणार्थेच्छा हि मधुकृच्छिक्षितेन मयोज्झिता।
राजार्थिहिंस्रचोरद्विट्कालेभ्यो न बिभेम्यतः ।।१६।।
निरिच्छः परितुष्टात्मा यदृच्छालाभतोऽस्मि सन्।
बहुकालं शये नो चेद्विद्वान् धैर्यान्महाहिवत् ।।१७।।
भूर्यल्पं स्वादु वाऽस्वादु कदन्नं मानवार्जितम्।
समानं क्वापि भुञ्जेन्हि निशि भुक्त्वाऽपि वा न वा ।।१८।।
हरत्यन्यः पतिं हत्वा कृच्छ्राप्तं मधुवद्धनम्।
शिक्षितं मधुकृत्तोऽतो विरक्तोऽस्म्यपरिग्रहः ।।१९।।
दैवाप्तं चर्म वल्कं वा वस्त्रं क्षौमं वसेन वा।
क्वचिच्छयेऽश्मभस्मादौ कशिपौ वा जने वने ।।२०।।
क्वचित्स्नातोऽलङ्कृतोऽहं स्रग्वी सुवसनो न वा।
रथेभाश्वैश्वरे क्वापि मुनिवत्क्वापि मुग्धवत् ।।२१।।
नाहं निन्दे न च स्तौमि स्वभावविषमं नरम्।
एतेषां श्रेय आशास उतैकात्म्यमथात्मनि ।।२२।।
ब्रह्मासक्तो ब्रह्मनिष्ठो ब्रह्मात्मा ब्रह्मधीरहम्।
संस्कृते ब्राह्मणेऽन्त्ये वा समदृग्गवि शुन्यपि ।।२३।।
समासमाभ्यां विषमसमे पूजात ओदनम्।
नाद्यादित्यज्ञगृहिणो दोषो न समदृग्यतः ।।२४।।
स्वरूपेऽवासनस्तिष्ठाम्यान्वीक्षिक्यानया दिवि।
योऽमूमिच्छेत्तु तस्यायमुपायो विदुषः सुखः ।।२५।।
हुनेद्विकल्पं चित्तौ तं मनस्यर्थभ्रमे तु तत्।
वैकारिके तं मायायां तां स्वस्मिन् विपमेत्ततः ।।२६।।
शुद्धः सोऽहं परात्मैक इति दाढर्ये विमुच्यते।
हृदयं मे सुगुप्तं ते प्रोक्तं तत्त्वं विचारय ।।२७।।

इतीशेनोपदिष्टः स ज्ञात्वाऽऽत्मानं प्रपूज्य च।
तदाज्ञप्तो ययौ राज्यं कुर्वन्नपि स दैवभुक् ।।२८।।
राज्यश्रीपुत्रदाराढ्योऽप्यलिप्तः स्वात्मदृक् सदा।
भुक्त्वाऽऽरब्धं चिरं राज्यं दत्वा पुत्रे विरोचने ।।२९।।
मुक्तसंगश्चचार क्ष्मां समदृक् स गुरूक्तवत्।
इति श्रीमद्वासुदेवानंदसरस्वतीविरचिते दिगम्बरावतारे द्वितीयोऽध्यायः।।

।। श्रीगणेशाय नमः।। श्रीगुरुभ्यो नमः।।
तथैव साध्यदेवेभ्यो भगवानाह हृद्धिया।
धृतिसत्यशमाद्यैर्हृद्ग्रन्थिं छित्वा शमं नयेत् ।।१।।
गर्वाक्रोशान्यावमानद्रोहकामादयोऽर्थहाः।
त्याज्याः क्रूराऽरुंतुदाऽसद्वाक् च सह्या ततोऽव्यथः ।।२।।
तद्वत्सन्मुन्यसच्चोरसंगी रंगात्पटो यथा।
स्वयं सहिष्णुर्नो कुर्यान्निन्दाघातादि दैवभाक् ।।३।।
वाक्सेव्या-व्याहृत्या सत्या प्रिया धर्म्या च सद्युजा।
चिन्त्यो भावो नान्यरंध्रं नेक्ष्यं देयं प्रतिश्रुतम् ।।४।।
सुहृत्सेव्योऽधमो नैव श्रद्धेयं श्रेय आत्मनः।
समोनिन्दाप्रशंसादौ तथोत्कर्षापकर्षयोः ।।५।।
प्रहृष्टं शोकराहित्यं दुर्वृत्ताच्च निवर्तनम्।
श्रेयोमार्गो यमादेय इतीशः प्राह तेऽभजन् ।।६।।
एवं सुरर्षिप्रमुखा भगवद्भावमद्वयम्।
प्रसादेनैव संप्राप्ता भक्तिगम्यस्य चात्मनः ।।७।।
परोऽसौ पुरुषो भूमा भक्त्या लभ्यो ह्यनन्यया।
क्रमेण पुण्यशीलेन सता नान्येन दुष्कृता ।।८।।
स्मरणेऽस्यार्जुनोऽलर्को वन्दने दास्य आयुरित्।
सख्ये रामो विष्णुदत्तः सेवने यदुरर्चने ।।९।।

कीर्तने वेदधर्मा च श्रवणे दीपको हरेः।

एते चान्येन बहवः स वः स्वात्मनिवेदने ।।१०।।

यो यो यां यां कृती भक्तिं वृणुते तस्य तस्य सः।

तां तां स्थिरीकृत्य दत्ते हृद्यमर्थं त्र्यधीश्वरः ।।११।।

इति दिगम्बरावतारे तृतीयोऽध्यायः।।

(अर्घ्याणि)**योगपालाय देवाय दत्ताय परमात्मने।**

दिगम्बराय शान्ताय कर्मणाऽर्घ्यं ददाम्यहम् ।।१।।

दुःखदुर्गतिनाशाय दत्ताय परमात्मने।

योगारिष्टविनाशाय कर्मणाऽर्घ्यं ददाम्यहम् ।।२।।

योगारिष्टविनाशाय योगमायाधराय ते।

दिगम्बराय देवाय कर्मणाऽर्घ्यं ददाम्यहम् ।।३।।

अर्घ्यान्ते वसनं मालाविभूतिं च समर्पयेत् ।।४।।

इति दिगम्बरावतारकथनं नाम पंचदशोऽवतारः।।



श्रीदत्तात्रेयषोडशावतारचरित्रानि

अथ षोडशावतारचरितम्।

।। श्रीगणेशाय नमः।। श्रीकृष्णाय नमः।।

एवं स योगिराजाऽऽद्यैरवतारैर्महीतले।
भक्तिं ज्ञानं च वैराग्यं साष्टाङ्गं योगमुत्तमम् ।।१।।
नानारूपधरो भूत्वा नानासाधनसंहतिम्।
नानाधिकारभेदेन प्रकाश्य सफुटमीश्वरः ।।२।।
कृतकृत्य इव ज्ञानपर्यङ्के योगनिद्रया।
निद्राण इव संस्थौ भगवानत्रिनन्दनः ।।३।।
भक्ताः शिष्याश्च ते सर्वे समागत्य जगद्गुरुम्।
कृतकृत्याः प्रणम्येशं ददृशुः पद्मलोचनम् ।।४।।
कार्तिके शुद्धपक्षे तु द्वादश्यां बुधवासरे।
रेवत्यां भास्वदुदयवेलायां जगदाश्रयः ।।५।।
भक्तानां पश्यतां तत्र प्रादुरासीत्परात्परः।
इन्द्रनीलप्रतीकाशः कुर्वन् वितिमिरा दिशाः ।।६।।
अपरो वासरमणिराभातीवोदयं गतः।
स कृष्णः श्यामकमलनयनो ध्यानमङ्गलः ।।७।।
केवलं ध्यानमात्रेण सर्वाभीष्टप्रदो नृणाम्।
सर्वदेवमयो ध्येयः सर्वतीर्थास्पदः प्रभुः ।।८।।
सर्वधर्ममयः सर्वसुखरूपश्चिदात्मकः।
सत्यरूपः सत्यसन्धः सत्यसङ्कल्प ईश्वरः ।।९।।
मेघगम्भीरया वाचा सर्वेषां शृणुतां सताम्।
वागीश्वरेश्वरः प्राह शृण्वन्तु भजका इदम् ।।१०।।
सारात्सारं समुद्धृत्य दत्तं वः शीघ्रमोक्षजम्।
वैदिकः शाश्वतो धर्म इष्टदोऽनिष्टवारकः ।।११।।

अस्यैव योगरूढत्वान्नामान्वर्थकमुत्तमम्।
अस्यैव शब्दमूलत्वान्महत्त्वं नित्यताऽपि च ।।१२।।
अनेनाघं निवार्याशु मद्ध्यानप्रतिबंधकम्।
ततोऽनायासतो ध्यात्वा मत्सायुज्यं गमिष्यथ ।।१३।।
एवमुक्त्वा स भगवान् विरराम तदाऽपु ते।
अंगीचक्रुस्तथेतीशवचनं शिरसा मुदा ।।१४।।
तं कृष्णं श्यामकमललोचनं शांतविग्रहम्।
संपूज्य परया भक्त्या दद्यादर्घ्याणि भाविकः ।।१५।।
(अर्घ्याणिः**सर्वसिद्धांतसिद्धाय दत्ताय परमात्मने।**
कृष्णाय पद्मनेत्राय कर्मणाघ्र्यं ददाम्यहम् ।।१।। ।।१६।।
अखण्डाद्वैतरूपाय निर्गुणाय गुणात्मने।
कृष्णाय पद्मनेत्राय कर्मणाघ्र्यं ददाम्यहम् ।।२।। ।।१७।।
भक्तप्रियाय देवाय योगनिद्रातुराय च।
कृष्णाय पद्मनेत्राय कर्मणाघ्र्यं ददाम्यहम् ।।३।। ।।१८।।
एवं संपूज्य देवेशं रौप्यं दद्यात् स्वशक्तितः।
ब्राह्मणान् भोजयेत्तेन प्रसन्नो भवतीश्वरः ।।१९।।
इत्थं श्रीदत्तदेवस्यावतारा इह षोडश।
वर्णिताः पूजितास्ते तु जन्ममृत्युभयापहाः ।।२०।।
प्रथमो योगिराजोऽत्रिवरदाख्यो द्वितीयकः।
दत्तात्रेयस्तृतीयस्तु कालाग्निशमनाभिधः ।।२१।।
चतुर्थः पञ्चमो ज्ञेयः स योगिजनवल्लभः।
लीलाविश्वम्भरः षष्ठः सप्तमः सिद्धराजकः ।।२२।।
अवतारोऽष्टमो ज्ञानसागरो नवमस्तथा।
विश्वंभरोऽथ दशमो मायामुक्तोऽवधूतकः ।।२३।।
एकादशोऽवतारस्तु मायायुक्तोऽवधूतकः।
द्वादशस्त्वादिगुरुः शिवरूपस्त्रयोदशः ।।२४।।

चतुर्दशो देवदेवस्ततः पंचदशः स्मृतः।
दिगम्बरः षोडशस्तु कृष्णः श्यामब्जलोचनः ।।२५।।
षोडशैतेऽवताराः श्रीदत्तात्रेयस्य योगिनः।
अथ द्वादशमासानामधिपा मार्गशीर्षतः ।।२६।।
दत्तात्रेयो मार्गशीर्षे मासस्याधिपतिः स्मृतः।
लीलाविश्वंभरः पोषमासस्याधिपतिः स्मृतः ।।२७।।
माघस्य सिद्धराजस्तु फाल्गुने ज्ञानसागरः।
विश्वंभरस्तु चैत्रस्य मायामुक्तश्च माधवे ।।२८।।
ज्येष्ठस्य मायायुक्तश्चाषाढस्यादिगुरुर्मतः।
शिवरूपः श्रावणस्य देवदेवश्च भाद्रपः ।।२९।।
दिगम्बरश्चाश्विनस्य कार्तिकस्य च योगिराट्।
अधिकस्यात्रिवरदो दत्तात्रेयः प्रकीर्तितः ।।३०।।
येन मंत्रो गृहीतोऽत्र दत्तात्रेयस्य योगिनः।
तेन हि प्रथमे वर्षे मार्गशीर्ष्यां गुरुर्मुखात् ।।३१।।
दत्तात्रेयेति नामेदं गृहीतव्यं द्वितीयके।
लीलाविश्वंभराख्यं च तृतीये सिद्धराजकम् ।।३२।।
ज्ञानसागरकं तुर्ये ततो विश्वंभराभिधम्।
पञ्चमेऽब्देऽथ षष्ठेऽब्दे मायामुक्तं च सप्तमे ।।३३।।
मायायुक्तं चादिगुरुमष्टमे नवमे तथा।
शिवरूपं देवदेवं दशमेऽथ दिगम्बरम् ।।३४।।
एकादशे द्वादशेऽब्दे योगिराजमिति क्रमात्।
यस्मिन्वर्षे तु यन्नाम गृहीतं सद्गुरोर्मुखात् ।।३५।।
परंपराभिज्ञमुखादभावे सद्गुरोरपि।
भोजनादौ तु तन्नाम कीर्तनीयं प्रयत्नतः ।।३६।।
एवं द्वादशवर्षान्तं कीर्तनीयं यथाक्रमम्।
ततो द्वादशवर्षोर्ध्वं श्रीदत्तात्रेयकीर्तनम् ।।३७।।

इति श्रीमद्वासुदेवानंदसरस्वतीविरचितं श्रीदत्तात्रेयषोडशावतारचरितं संपूर्णम्।।

अथ संक्षेपतो दत्तषोडशावतारचरितम्।

अत्रिः पुत्राज्ञयेच्छुः सुतमथ तपसे संस्थितः संयतोऽद्रौ
के प्राणायामपूर्वं शतसमममुना राजयोगेन नित्यः।
ज्ञानानन्दैकरूपः प्रकृतिगुणपरः पूरुषश्चिन्तितो यो
भर्ता योगस्य दाताऽखिलजनसविता योगिराजः स आद्यः।।१।।
त्यक्त्वा तामात्मसंस्थामगुणसुखमयीमत्रिणाराधितोऽसौ
स्वालम्ब्यात्मसुप्तां प्रकृतिमथ तया व्यक्तमाहर्षिमीशः।
दत्तोऽहं मयात्रे वरद इति तदा सैव तस्याभिधाऽभूत्
षड्बाहुर्यस्त्रिमूर्तिः सकलसुरपतिः सोऽवतारो द्वितीयः ।।२।।
भक्तोद्धारैककृत्ये प्रकृतिगुणयुगं व्यर्थमेवेति मत्वा
त्यक्तां तस्मादभूताममृतकिरणदुर्वाससौ सत्त्वयोगात्।
अत्रेः पुत्रत्वमैच्छद्भवति हरिरयं विश्वपाता यदंश-
स्तस्मादुक्तिः पुराणेष्वयमृषितनयो विष्णुरिच्छन्स दत्तः ।।३।।
अत्रेर्भावानुरूपं प्रलयदहनवद्व्यक्त आदौ ततस्तं
तप्तं दृष्ट्वाग्निना च स्वजनकरुणया पूर्णचन्द्रः स दत्तः।
तस्थौ संग्रस्य वह्निं मुनिहृदि विमलानसूयोदरेऽष्टौ
वारान् संस्थाय कालानलशमन इति प्रादुरासीच्छुभाहे ।।४।।
अत्रेर्गेहेऽवतीर्णः परपुरुष इति द्रष्टुकामान् समेताँ-
ल्लेखान् सिद्धर्षिसंघान् निजमतिसुचिरं रूपमैशं च भावम्।
विश्वात्मा दर्शयित्वा पुनरपि शिशुतां प्रीणनार्थं स्वपित्रो-
राश्रित्यासीदगारे शुभतररचितो योगिनां वल्लभोऽसौ ।।५।।
क्रीडायै दक्षिणासां मुनिसुतसहितः संययौ तत्र सृष्टं
तेषां भावेक्षणार्थं वनमतिललितं केऽपि तत्रैव सक्ताः।
केऽप्येनं नो जहुस्ते न्यविशत जलधिं चित्रलीलाविलासो
लीलाविश्वंभरोऽसौ स्वजनकरुणया प्रादुरासीत्ततोऽब्धेः ।।६।।
काले काप्यात्मभक्तान् स्वभजनविमुखांस्तुच्छसिद्ध्यातिदृप्तान्
स्वासक्तान् कर्तुकामो मुनिरिव स तदा तेषु तस्थौ ततस्ताम्।

हत्वा स्वा योगसिद्धीर्व्यतनुत बहुशो भोगमोक्षैकहेतुं
स्वीयं मन्त्रागमं च प्रभुरखिलगुरुः सिद्धराजः स दत्तः ।।७।।
वेदाः साङ्गाः सयज्ञा विधिनियमपदं लुप्तमासीत्पुरेदं
तत्सृष्टं येन भूयः सकलतनुभृतां धर्मसंस्था व्यधायि।
देवो विज्ञानसिन्धुः सुविमलमनसां ध्येय ईड्यश्च पुंसां
ज्ञेयः सोऽस्यावतारोऽष्टम इति कृपया पाति भक्तान् भवाब्धेः।।८।।
पूर्वं संस्थापितं यत्सुविहितमपि सत्कर्म नर्ते स्वभक्ते-
र्मोक्षस्यापादकं स्यादिति मनसि विचिन्त्यैकदा भक्तवृन्दे।
व्यक्तः स्वं भक्तियोगं व्यनुत भगवानात्मसंप्राप्तिहेतुं
दत्तो विश्वंभरोऽसौ भजनरतिमतां योगसिद्धिं ददाति ।।९।।
भक्तानामीक्षमाणः प्रणयमतियुवा रुक्मकान्तिः प्रसन्नः
संदर्शालापमुख्यैः सुललितनिजचेष्टितैः पावयंस्तान्।
भिक्षौ रूपेण मह्यां विचरति सततं द्वन्द्वभावव्यपेतो
मायामुक्तोऽवधूतोऽभयदगुणमहाध्वान्तधूः सत्प्रकाशः ।।१०।।
आसीद्यस्य प्रसादादसदृशमहिमा हैहयोऽनंतशक्ति-
र्जम्भोऽपि स्वर्गनाथः सुरपतिरमरैर्यं समाराध्य सर्षिः।
स्वर्लेभे दैत्यनाशान्नहुषमपि सुतं तत्पिता शक्रतुल्यं
मायायुक्तः स दत्तः परशुभृदभजद्यं च पित्रोः शुभार्थी ।।११।।
भ्राता निर्वेदहेतोर्विरचितविपदं मातृवाक्यादलर्कं
संतं सम्यग्दिदृक्षुं कृतशुभवसतिं सह्यगोत्रे प्रसन्नम्।
कस्त्वं कस्यापि दुःखं कथमिति वचसैवाकरोदात्मनिष्ठं
पश्चात्साङ्गं स्वयोगं गुरुरवददसावादिपूर्वस्तथान्यान् ।।१२।।
भक्तानां योगदाता गुणतिमिरधुनिर्ज्ञानविज्ञानसूर्य-
स्तेषां केषां स्वकार्येऽखिलजननिलये केवलानंदरूपे।
सायुज्यं कामुकानां मुदितमुनिवरः पिङ्गलो नागसंज्ञो
लेभे यच्चादिदेवः शिवतनुरगुणः सर्वदा योगनिष्ठः ।।१३।।

द्यां यातानामात्मभक्तान् बहुविधभजनैः स्वं समोनेतुकामः
सिद्धेरानीय कृष्णामलकनगमये तस्य मूलेऽवतीर्णः।
श्रीदत्तो देवदेवः ससुरमुनिनरा यस्य संदर्शमात्रा-
द्वेधोद्वासत्पतिः संख्यगमदतिभवां मुक्तिमद्वैतसंज्ञाम्   ।।१४।।
प्रल्हादः साध्यदेवा यदुरपि नृवरोऽनुग्रहाद्यस्य चान्ये
योगर्द्धिं प्राप्य तस्थुः सुविमलहृदयाः केवलानन्दमग्नाः।
योगीशो योगपालः प्रकृतिगुणपरः केवलानन्दरूपो
दिग्वासा दिव्यमूर्तिः शिखरिनिवसतिः सोऽतिसौन्दर्यराशिः।।१५।।
पूर्वं लीलावरैर्दशभिरपि विभुर्ज्ञानतत्पूर्वयत्नै-
र्दत्वात्मप्राप्तिसिद्धिं परमगतिमयीं भक्तसंघस्य भूम्नः।
दिव्ये स्थाने समं तैर्निरवधिविभवे संस्थितोऽनंतलीलः
श्रीदत्तः कृष्णमूर्तिः सरसिजनयनो योगनिद्रारतोऽभूत्   ।।१६।।
तस्य श्रीकृष्णमूर्तेश्चरितमतिशुभं वेद सम्यक् स एकः
सर्वज्ञः श्रीगुरुर्यो निजपदमतुलं तेन यस्मिन्न्यधायि।
येनैतर्ह्यत्र भूयः प्रकटितममलं ज्ञानयोगादि सर्वं
तद्भक्तोद्धारहेतोः स भवति हि तथा प्रीयमाणोऽस्य भक्तः।।१७।।
दत्तात्रेयः परात्मा प्रकृतिगुणयुतः सर्वसृष्टेर्निदानं
यत्सत्ताभ्यन्वितोयं सृजति विधिरिदं पाति विष्णुश्च रुद्रः।
संहर्ता येन भास्वद्विधुमरुदनला धर्मवंतस्तथान्ये
न्यूनं विश्वात्मनोऽस्याचरितमिदमिति प्रोच्यतां किन्त्वनन्तम्।।१८।।
श्रीमदादिगुरोरेवं चरितं पुण्यमुत्तमम्
पुराणोक्तकथासंघसूचनार्थं समासतः   ।।१९।।
उक्तं वेदाष्टदशभिः श्लोकैः पापौघनाशनम्।
पठतां शृण्वतां भक्त्या तन्याच्छिवमहर्निशम्   ।।२०।।

इति श्रीमदादिगुरुदत्तात्रेयदिगंबरानुचरविरचिते
श्रीदत्तात्रेयमाहात्म्ये संक्षेपेण सर्वग्रंथतात्पर्यवर्णनं संपूर्णम्।।

श्रीदत्तगुरवः प्रीयन्ताम्।